सव्याख्यानयोगभाष्यारंभः क्रियते।

669

Savyakhyan Yogabhashya Prarambha Kriyate

21/13(A)

पां॰टी॰ श्रीगणेशाय नमः ॥ नमामि जगदुत्पत्तिहेतवे वृषकेतवे क्लेशकर्मविपाकादिरहिताय च नत्वा पतंजलिमृषिं वेदव्यासेन भाषिते संक्षिप्तमस्य वृ
१ र्थं भाष्ये व्याख्या विधास्यते ॥ इह हि भगवान्पतंजलिश्चिकीर्षितस्य शास्त्रस्य संक्षेपतस्तात्पर्यार्थं शास्त्राभिधेययोः प्रतिपाद्यप्रतिपादकलक्षणः संबंधो अभिधेय
स्य योगस्य कैवल्यस्य च साध्यसाधनभावः प्रेक्षावत्प्रवृत्त्यंगभूतोऽत्र मुखावबोधार्थमादिसूत्रमुपदादिदं तत्रैव पंचकार अथ योगानुशासनं तत्र प्रथमावयव
मथशब्दं व्याचष्टे अथेत्ययमधिकारार्थः अथैष ज्योतिरितिवत् न त्वानंतर्यार्थः ॥ अनुशासनमिति । हि शास्त्रमाह अनुशिष्यतेऽनेनेति व्युत्पत्त्या । न चाप्यरामप्यमाद्य
त्वप्रवृत्तिः अपितु योगविषयतत्त्वज्ञानविरक्त्याद्युपपादनानंतरं जिज्ञासानयोः स्यात् । यथाम्नायते । तस्माच्छांतो दांतः उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्ये

श्रीगणेशाय नमः अथ योगानुशासनं ॥ ॥ अथेत्ययमधिकारार्थः १

दित्यादि शिष्यप्रश्नस्य पश्चाद्गुरणार्थापनाद्युपयोगानंतर्यस्य च संभवेऽपि नाभिधानं । शिष्यप्रतीतिप्रश्नयोरनुपयोगात् प्रामाणिकत्वे योगानुशासनस्य तदभावेऽप्युपपत्ता
त् अप्रामाणिकत्वे च तद्भावेऽपि हेयत्वात् एतेन तत्त्वज्ञानविरक्त्याद्यविषयोरानंतर्याभिधानं परास्तं । अधिकारार्थत्वे तु शास्त्रेणाधिक्रियमाणस्य प्रस्तूयमानस्य योगस्याभि शिव
धानात् । सकलशास्त्रतात्पर्यार्थव्याख्यानेन शिष्यः सुखेनैव बोधितश्च प्रवर्तितश्च भवतीति । निश्रेयसस्य हेतुः समाधिरिति हि स्फुटं । तिस्तेनीतिहासपुराणेषु प्रसिद्धं । ननु १
किं सर्वसंदर्भगतो यश्च बोधिकारार्थस्तथा समथ्यानोऽर्थ इह जिज्ञासेत्याद्यवयवप्रसंगस्तत्राह अथ इति १

ननु हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातन इति योगियाज्ञवल्क्यस्मृतेः कथं पतंजलेर्योगशास्त्रकर्तृत्वमित्याशंक्य सूत्रकारेणानुशासनमित्युक्तं। शिष्टस्य शासनमनुशासनमित्यर्थः। यद्यप्यथशब्दोऽधिकारार्थस्तदैव वाक्यार्थः संपद्यत इत्याह। योगानुशासनं शास्त्रमधिकृतमिति ननु व्युत्पाद्यमानतया योगोऽत्राधिकृतो न तु शास्त्रमित्यत आह तत्राह वेदितव्यमिति। सत्यं। व्युत्पाद्यमानतया योगः प्रस्तुतः स तु तद्विषयेण शास्त्रेण करणेन व्युत्पाद्यः करणगोचरतया तु योग एवाधिकृत इति भावः। अधिकारार्थस्य चाथशब्दस्यान्यार्थं नीयमानोदकुंभदर्शनमिव श्रवणं मंगलायापि कल्प्यते इति मंतव्यं शास्त्रसंदेहानिमित्तमर्थसंदेहमपनयति। योगः समाधिः युज समाधावित्यस्माद्व्युत्पन्नः समाधिः। युज समाधावित्यस्मात् व्युत्पन्नः समाध्यर्थो न तु युजिर् योगे इत्यस्मात् संयोगार्थः। ननु समाधिरपि वक्ष्यमाणस्यांगिनो योगस्यांगं न चांगमेवांगीत्यत आह

योगानुशासनं शास्त्रमधिकृतं वेदितव्यं। योगः समाधिः स च सार्वभौमश्चित्तस्य धर्मः। क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः २

स च सार्वभौमः च त्वर्थो योगांगेभिन्नत्ति। भूमयो वक्ष्यमाणाः मधुमती मधुप्रतीका विशोका संस्कारशेषास्ताः स्थितस्य। तासु सर्वासु विदितः सार्वभौमश्चित्तवृत्तिनिरोधलक्षणो योगस्तदंगं तु समाधिर्नैवं भूतः व्युत्पत्तिनिमित्तमात्राभिधानं चैतद्योगः समाधिरिति अंगांगिनोरभेदविवक्षामात्रेण। वृत्तिनिमित्तं तु योगशब्दस्य चित्तवृत्तिनिरोध एवेति परमार्थः वृत्तयोऽतो नान्यान्याश्रयाः अतस्तन्निरोधेन व्याप्तात्माश्रित एवेति पश्यंति तन्निरासायाह। चित्तस्य धर्म इति। चित्तशब्देनांतःकरणं बुद्धिमुपलक्षयति। न हि कूटस्थनित्या चितिशक्तिरपरिणामिनी ज्ञानधर्मिणी भवितुमर्हतीति बुद्धिस्तु भवेदिति भावः। स्यादेतत्। सार्वभौमश्चेद्योगः हंत भोः क्षिप्ता अपि चित्तभूमयोऽस्ति च परस्परापेक्षयो वृत्तिनिरोधोऽप्यस्ति तत्रापि योगत्वप्रसंग इत्याशंक्य हेयोपादेयभूमीरुपन्यस्यति क्षिप्तमित्यादि। क्षिप्तं सदैव रजसा तेषु क्षिप्यमाणमत्यंतमस्थिरं मूढं तु तमःसमुद्रेकान्निद्रावृत्तिमत् क्षिप्तविशिष्टः स्थेमबहुलस्य कादाचित्कः स्थेमा सा चासौ स्थेमबहुलता तां सिद्धिकीं वा वक्ष्यमाणा

पां·टी·
२

तत्रक्षिप्तमूढयोःसत्त्वविपर्ययापेक्षयावृत्तिनिरोधेपारंपर्येणापिनिःश्रेयसहेतुभावात्तदुपघातकत्वाच्चयोगपक्षाद्दूरोत्सारितत्वमितिनतयोर्योगत्वंनिषिद्धंविक्षिप्तस्य
तुकादाचित्कसद्भूतविषयस्यैवमशालिनःसंप्राप्येतयोगत्वमितिनिषेधति।तत्रविक्षिप्तेचेतसिसमाधिःकादाचित्कसद्भूतविषयस्यचित्तस्यरुध्यमानयोगपक्षेवर्त्ततेकस्मा
द्यतःतद्विपक्षविक्षेपोपसर्जनीभूतःविपक्षवर्गान्तर्गतस्यहितस्यरूपमेवदुर्लभंप्रागेवकरणं।तत्खलुदहनान्तर्गतंबीजमिवचतुःक्षणमवस्थितमुत्तममप्यंकुरायकल्प्यतइति
भावः।यदिविक्षेपोपसर्जनीभूतःसमाधिर्नयोगःकुत्रहिइत्यतआहयत्त्वेकाग्रेचेतसीतिभूतमितिसमारोपितमर्थंनिवर्त्तयति निरुद्धवृत्तिरपिस्वालंबनेनतमसिभ
तेभवत्येकाग्रेस्यात्तदुक्तंसदितिशोभनंनितांतविभ्रंतंसत्त्वंतमःसमुद्रेकसत्त्वशोभनंतत्स्यक्लेशहेतुत्वादितिद्योतमानंहिनतत्त्वज्ञानमागमाद्यागमाद्यनुमानाद्यभवद्
विपरोक्षरूपतयानसाक्षात्कारवतीमविद्यामुच्छिनत्तिदिव्चंद्रदिङ्मोहादिदृष्टानुच्छेदकत्वात्तत्राहप्रेता।प्रशब्दोहिप्रकर्षंद्योतयन्साक्षात्कारंसूचयतित्रविद्याम्लत्वाद्

तत्रविक्षिप्तेचेतसिविक्षेपोपसर्जनीभूतःसमाधिर्नयोगपक्षेवर्त्ततेयस्त्वेकाग्रेचेतसिसद्भूतमर्थंप्रद्योतयतिक्षिणोतिचक्लेशान्कर्मबंधनानिश्ल
रो थयतिनिरोधमभिमुखंकरोतिससंप्रज्ञातोयोगइत्याख्यायतेसचवितर्कानुगतोविचारानुग‸ तआनंदानुगतोस्मितानुगतइत्युपरिष्टान्निवेदयिष्यामः।
स्मितादीनांक्लेशानांविद्या[illegible]पाभ्याविद्योच्छेदरूपत्वात्विद्योदयेवाविद्यादिक्लेशसमुच्छेदो॥सर्ववृत्तिनिरोधेत्वसंप्रज्ञातःसमाधिः ५
विरोधित्वात्कारणविनाशाच्चेत्याहक्षिणोतीतिचेतिअतएवकर्मरूपाणिबंधनानिश्लथयति।कर्मचात्रएवंभिमतंकार्येकारणोपचारात्तच्छ्लथयतिस्वकार्यादवसादयति २
वक्ष्यतिहिसतिमूलेतद्विपाकइतिकिंचनिरोधमभिमुखंकरोतिअभिमुखीकरोतीतिसचसंप्रज्ञातश्चतुःप्रकारइत्याहसचेतिअत्रासंप्रज्ञातमाहसर्ववृत्तीतिरजस्तमोमयीकि
लप्रमाणादिवृत्तिःसात्त्विकीवृत्तिमुपाददतेसंप्रज्ञातेनिरुद्धाअत्रअसंप्रज्ञातेतुसर्वासामेवनिरोधइत्यर्थः।तदिहभूमिद्वयसंमाप्यामेधुमसादवाभ्यामपेत्ताःसर्वास्तासुवि
दितःसार्वभौमइतिसिद्धं ५

द्वितीयसूत्रमवतारयति तस्य लक्षणमिति तस्येति पूर्वसूत्रोपात्तं द्विविधं योगं परामृशति योगश्चित्तवृत्तिनिरोधः निरुध्यन्ते यस्मिन् प्रमाणादिवृत्तयो ऽवस्थाविशेषे चित्त-
स्य सोऽवस्थाविशेषो योगः ननु संप्रज्ञातस्य योगस्याव्यापकत्वादलक्षणमिदं अनिरुद्धा हि तत्र सात्विकी चित्तवृत्तिरित्यत आह सर्वशब्दाग्रहणादिति यदि सर्वचि-
त्तवृत्तिनिरोध इत्युच्येत भवेदव्यापकं संप्रज्ञातस्य क्लेशकर्मविपाकाशयपरिपन्थी चित्तवृत्तिनिरोधस्तु तमपि संगृह्णाति तत्रापि राजसतामसचित्तवृत्तिनिरोधात् त-
स्य च तद्भावादित्यर्थः कुतः पुनरेकस्य चित्तस्य क्षिप्तादिभूमिसंबंधः किमर्थं चैवमवस्थस्य चित्तस्य वृत्तस्य वृत्तयो निरोद्धव्या इत्याशंक्य प्रथमं तावदवस्थासंबंधे हेतुमुपन्य-

तस्य लक्षणाभिधित्सयेदं सूत्रं प्रववृते। योगश्चित्तवृत्तिनिरोधः सर्वशब्दाग्रहणात्संप्रज्ञातोऽपि योग इत्या-
ख्यायते॥ चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात्त्रिगुणं ५

सतीति चित्तं हीति प्रख्याशीलत्वात्सत्वगुणं प्रवृत्तिशीलत्वाद्रजोगुणं स्थितिशीलत्वात्तमोगुणं प्रख्याग्रहणमुपलक्षणार्थं तेनान्येऽपि सात्विकाः प्रसादला-
अ घवप्रीत्यादयः सूच्यन्ते॥ प्रवृत्तिश्च परितापशोकादयो राजसाः प्रवृत्तिविरोधी तमोवृत्तिधर्मः स्थितिः। स्थितिग्रहणाद्गौरवावरणादैन्यादय उपलक्ष्यन्ते। एतदुक्तं
भवति एकमपि चित्तं त्रिगुणनिर्मितं तत्तया गुणानां च वैषम्ये परस्परविमर्दे वैचित्र्याद्विचित्रपरिणामभेदेनैकावस्थमुपपद्यत इति ५

पां.टी. क्षिप्ताद्या एव चित्तस्य भूमीर्यथासंभवमवांतरावस्थाभेदवतीरादर्शयति। प्रख्यारूपं हीति चित्तरूपेण परिणतं सत्वं चित्तसत्वं। तदेवं प्रख्यारूपतया सत्वप्राधान्यं चित्तस्य द
३ र्शितं। न चित्तसत्वान् किंचिदूने रजस्तमसी यदा मिथः समे च भवतस्तदैश्वर्यं च विषयाश्च शब्दादयस्त एव प्रियाणि यस्य तत्तथोक्तं। सत्वप्रधानमप्येतत्खलु चित्तं तत्वप्रणिधित्स
द्यपि तत्वस्य तमसा विहितत्वादणिमादिकमैश्वर्यमेव तत्वमभिमन्यमानं तत्प्रणिधित्सति प्रणिधत्ते वक्ष्यमाणं। अथ रजसा क्षिप्यमाणं तत्राप्यनवस्थितित्क्षिप्यमा
नं भवति शब्दादिषु पुनरस्य स्वैरसवाहीभूमा निरूढ एव। तदनेन विक्षिप्तं चित्तं दर्शयन्मूढमपि सूचयति तदेव तमसेति यदा हि तमोरजो विजित्य प्रवृत्तं तदा चित्त

प्रख्यारूपं हि चित्तसत्वं रजस्तमोभ्यां संसृष्टं ऐश्वर्यविषयप्रियं भवति। तदेव तमसानुविद्धं अधर्माज्ञानावैराग्यानैश्वर्योपगं भवति तदेव
प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति ६

सत्वावरकतमःसमुत्सारणेऽशक्तत्वाद्रजसस्तमःस्थगितं चित्तमधर्माद्युपगच्छति अज्ञानं च विपर्ययज्ञानमभावप्रत्ययालंबनं च निद्राज्ञानमुक्तं तत एव मूढावस्था
पि सूचितेति अनैश्वर्यं सर्वत्रेच्छाप्रतीघातः अधर्मादियोगाच्चित्तं भवतीत्यर्थः यदा तु तदेव चित्तसत्वमाविर्भूतसत्वमपगततमःपटलं सरजस्कं भवति तदा धर्मज्ञानवैराग्यै
श्वर्याण्युपगच्छतीत्याह प्रक्षीणेत्यादि मोहस्तमस्तदेवावरणं प्रकर्षेण क्षीणं यस्य तत्तथोक्तं अत एव सर्वतो विशेषाविशेषलिंगपुरुषेषु प्रद्योतमानं तथापि न ध ३
र्माद्यैश्वर्याण्यवकल्प्यते प्रवृत्त्यभावादित्यत आह अनुविद्धं रजोमात्रया रजसः प्रवर्तकत्वादस्ति धर्मादिप्रवृत्तिरित्यर्थः तदनेन संप्रज्ञातसमाधिसंपन्नयोर्मधुभूमि
कप्रज्ञाज्योतिषोर्मध्यमयोर्योगिनोश्चित्तसत्वं संगृहीतं ६

संप्रत्यतिक्रांतभावनीयस्य ध्यायिनश्चतुर्थस्य चित्तावस्थामाह तद्देव चित्तं रजोलेशान्मलादपेतमत एव स्वरूपप्रतिष्ठमभ्यासवैराग्यपुटपाकप्रबंधविमलतरजस्तमोमलस्य हि बुद्धि
सत्वतपनीयस्य स्वरूपे प्रतिष्ठायां विषयेंद्रियप्रत्याहतस्मान्नवसितताधिकारतया चकार्यकारिणो विवेकख्यातिः परं कार्यमवशिष्यत इत्याह सत्वपुरुषान्यताख्यातिमात्रं चित्तं धर्ममे

तद्देव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्वपुरुषान्यताख्यातिमात्रं धर्ममेघध्यानोपगं भवति तत्परं प्रसंख्यानमित्याचक्षते ध्यायिनः ७

घध्यानोपगं भवति धर्ममेघश्च वक्ष्यते । अत्रैव योगिजनप्रसिद्धिमाह तदिति सत्वपुरुषान्यताख्यातिमात्रं चित्तं धर्ममेघपर्यंतं परं प्रसंख्यानमित्याचक्षते ध्यायिनः चित्तसामाना
धिकरण्यं च धर्मधर्मिणोरभेदविवक्षयाद्रष्टव्यं ७

विवेकख्यातेर्हानहेतुं चितिशक्तेश्चोपादानहेतुं निरोधसमाधिमवतारयितुं चितिशक्तेः साधुतामसाधुतां च विवेकख्यातेर्दर्शयति चितिशक्तिरित्यादि। सुखदुःखमोहात्मकत्वमशु
द्धिः सुखमोहावपि हि विवेकिनं दुःखीकुरुतः अतो दुःखवद्धेयौ तथा चातिसुन्दरमप्यन्तवद्दुनोति नेनतदपि हेयमेव विवेकिनः। सेयमविशुद्धिरंतश्च चितिशक्तेः पुरुषेणस्तर
स्कंते शुद्धा चानंता चेति ननु सुखदुःखमोहात्मकशब्दादीनियं चेन्न प्रमाणात् तदाकारापन्नैव कथं विशुद्धत्तदाकारपरिणामपरिवर्जनेच कुर्वती कथमनंते स्यत उक्तं दर्शितविषये
ति दर्शितो विषयः शब्दादिर्यस्यै सा तथोक्ता भवेदनेदंतदेवं यदि बुद्धिवच्चितिशक्तिर्विषयाकारा तामापद्येत। किं तु बुद्धिरेव विषयाकारेण परिणता सती अतदाकाराये चितिश
क्तये विषयमादर्शयति। ततः पुरुषश्चेतयत इत्युच्यते। ननु विषयाकारां बुद्धिमनारूढायाश्चितिशक्तेः कथं विषयवेदनं विषयारोहे वा कथं न तदाकारापत्तिरित्यत उक्तं

चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धा चानंता च सत्त्वगुणात्मिका चेयमतो विपरीता विवेकख्यातिरित्यतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरु तं
न णद्धि तदेवंस्थं संस्कारोपगं भवति स निर्बीजः समाधिः न तत्र किंचित्संप्रज्ञायत इत्यसंप्रज्ञातः द्विविधः स योगश्चित्तवृत्तिनिरोध इति २

अप्रतिसंक्रमेति। प्रतिसंक्रमः संचारः स चितेर्नास्तीत्यर्थः स एव कुतः स्यान्नास्तीत्यत उक्तं अपरिणामिनीति न चितेस्त्रिविधोपि धर्मलक्षणावस्थालक्षणः परिणामोस्ति येन क्रि
याद्रूपेण परिणता सती बुद्धिसंयोगेन परिणमेत चितिशक्तिः असंक्रांतायाश्च विषयसंवेदनमुपपादयिष्यते तस्माच्छुद्धा चितिशक्तिः शोभनेति। विवेकख्यातिस्तु बुद्धिस
त्त्वात्मिका अशोभनेत्युक्तं अतश्चितिशक्तेर्विपरीतेति यदा च विवेकख्यातिरपि हेया तदा कैवल्यकथा दूरतः तस्यां दोषदर्शनान्निरुत्पत्तिभावः ततस्तद्वृत्तेर्निरोधसमाधेरवतारोपु ४
ज्यत इत्याह अतस्तस्यामिति ज्ञानप्रसादमात्रेण हि परेण वैराग्येण विवेकख्यातिमपि निरुणद्धीत्यर्थः अथ निरुद्धं कीदृशं भवति। चेतकीदृशमित्यत आह तदवस्थमित्यादि स निरो
धो ह्यवस्थामस्य तत्तथोक्तं निरोधस्वरूपमाह निर्बीज इति क्लेशसहितः कर्माशयो जात्यायुर्भोगबीजं तस्मान्निर्गत इति निर्बीजः अस्य अस्य च योगिजनप्रसिद्धामन्वर्थसंज्ञामा
दर्शयति। न तत्रे। उपसंहरति। द्विविधः स योगः चित्तवृत्तिनिरोध इति २

संप्रसुत्तरसूत्रमवतारयंश्चोदयति तदवस्थे चेतसीति किमाक्षेपे। तत्तदाकारपरिणतबुद्धिबोधात्मा खल्वयं पुरुषः सदानुभूयते न तु बुद्धिबोधरहितोऽतोऽस्य पुरुषस्य बुद्धिबोधात्स्वभावः सवितुरिव प्रकाशः न च संस्कारशेषे तादृशोऽस्ति। न च स्वभावमपहाय भावो वर्त्तितुमर्हति। निर्भावः स्यादेतत्। संस्कारशेषामपि बुद्धिं कस्मात् पुरुषो न बुद्ध्यत इत्यत आह विषयाभावादिति न बुद्धिमात्रे पुरुषस्य विषयोऽपि तु पुरुषार्थवती बुद्धिः विवेकख्यातिर्विषयभोगो वा पुरुषार्थौ तौ च निरुद्धावस्थायां न स्त इति सिद्धो विषयाभाव इत्यर्थः सूत्रेण परिहरति तदा द्रष्टुः स्वरूपेऽवस्थानं स्वरूप इत्यारोपितांशं तद्घोरमूढत्वरूपत्वं निवर्त्तयति। पुरुषस्य हि चेतनं स्वरूपमनौपाधिकं न तु बुद्धिबोधः शान्तादिरूपः स ह्यौपाधिको हि स्फटिकस्येव स्वभावस्य धवलस्य जपाकुसुमसन्निधानोपाधिररुणिमा न चोपाधिनिवृत्तावुपहितनिवृत्तिरतिप्रसंगादिति भावः स्वरूपस्य चाभेदेऽपि भेदं विकल्प्याधिकरणा

तदेवस्थे चेतसि विषयाभावाद्बुद्धिबोधात्मा पुरुषः किंस्वभाव इति १ तदा द्रष्टुः स्वरूपेऽवस्थानं॥ स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये व्युत्थानचित्ते तु सति तथापि भवन्ती न तथा ३

भाव उक्तः इति न्याय्यमेवार्थो भाष्यकृता द्योत्यते स्वरूपप्रतिष्ठा तदानीं निरोधावस्थायां न व्युत्थानावस्थायामिति भावः स्यादेतत् व्युत्थानावस्थायामप्रतिष्ठितारूपे चितिशक्तिर्निरोधस्थायां प्रतितिष्ठन्ती परिणामिनी स्यात् व्युत्थाने वा स्वरूपप्रतिष्ठा चेद्व्युत्थाननिरोधयोरविशेष इत्यत आह व्युत्थाने न चितेस्त्वभिनजानुकूलस्य नित्या चितिशक्तिः स्वरूपात् च्यवते तेन यथा निरोधे तथैव व्युत्थानेऽपि न खलु शुक्तिकायाः प्रमाणविपर्ययज्ञानगोचरत्वेऽपि स्वरूपोदयव्ययौ भवतः प्रतिपत्ता तु तथाभूतमप्यतथात्वेनाभिमन्यते निरोधसमाधिमपेक्ष्य संप्रज्ञातोऽपि व्युत्थानमेवेति ३

पा॰टी॰
५

सूत्रांतरमवतारयितुं पृच्छति कथंतर्हीति यद्यपि तथापि भवंती न तथा केन तर्हि प्रकारेण प्रकाशत इत्यर्थः हेतुपदं व्याख्याय सूत्रं पठति दर्शितविषयत्वात् वृत्तिसारूप्यमितरत्र इतरत्र व्युत्थाने याश्चित्तवृत्तयः शांतघोरमूढास्तादृग्वृत्तिविशिष्टः अविभागावृत्तयो यस्य पुरुषस्य स तथोक्तः साहूप्यमित्यत्र सशब्दः एकरूपपर्यायः एतदुक्तं भवति जपाकुसुमस्फटिकयोरिव बुद्धिपुरुषयोः सन्निधानादभेदग्रहे बुद्धिवृत्तीः पुरुषे समारोप्य शांतोऽस्मि दुःखितोऽस्मि मूढोऽस्मीत्यध्यवस्यति यथा मलिने दर्पणतले प्रतिबिंबितं मुखं मलिनमारोप्य शोचत्यात्मानं मलिनोऽस्मीति यद्यपि पुरुषे समारोपो विशदादिविज्ञानवद्बुद्धिवृत्तिविषयपिचसाक्षात्तेनोऽविद्रूपतयानुभाव्यस्तथापि बुद्धेः पुरुषत्वमापादयत्पुरुषत्वमा

कथंतर्हि दर्शितविषयत्वात् इति वृत्तिसारूप्यमितरत्र व्युत्थाने याश्चित्तवृत्तयस्तदविशिष्टवृत्तिः पुरुषः तथा च सूत्रं एकमेव दर्शनं ख्यातिरेव दर्शनमिति १०

पादयत्पुरुषत्वमापादयत्पुरुषवृत्तिरिवानुभवरूपेवानुभवे इवावभासते तथा चायमविपर्ययोऽप्यात्मा विपर्ययवानिवाभोक्ताऽपि भोक्तेव विवेकख्यातिरहितोऽपि तत्सहितइव विवेकख्यात्या प्रकाशते एतच्च चितेरप्रतिसंक्रमायास्तदाकारापत्तौ बुद्धिसंवेदनमित्यत्र सत्त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोग इत्यत्र चोपपादयिष्यते एतच्च मतांतरेऽपि सिद्धमित्याह तथा चेति पंचशिखाचार्यस्य सूत्रं एकमेव दर्शनं ख्यातिरेव दर्शनमिति ननु कथमेकं दर्शनं यावता बुद्धेः शब्दादिविषया विवेकविषया च वृत्तिः साह तत याजडत्वेनानुभाव्या दर्शनं ततोऽन्यमनुभवो दर्शनमित्यत आह ख्यातिरेव दर्शनमिति उद्यमयथाधर्मिणीवृत्तिं ख्यातिं लौकिकीमभिप्रेत्येदमुक्तं एकमेवेति चैतन्यं तु पुरुषस्य ५
भावो न ख्यातेः चैतन्यं तु न लोकप्रत्यक्षगोचरोऽपि त्वागमानुमानगोचर इत्यर्थः १०

तदनेन व्युत्थानावस्थायां मूलकारणमविद्यां दर्शयता तद्धेतुकः संयोगो भोगहेतुः स्वस्वामिभावोपि द्रष्टृचित्तइतितमुपपादयन्नाह चित्तं स्वं भवति पुरुषस्य स्वामि
न इति संबंधः ननु चित्तजनितमुपकारं भजमानो हि चेतनश्चित्तस्येशिता नत्वस्य तज्जनितोपकारसंभवस्तदसंबंधादनुपकार्यत्वान्न च तत्संयोगात् तदुपकारभागि
त्वे परिणामप्रसंगादित्यत आह अयस्कांतमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेनेति न पुरुषस्य पुरः चित्तमपि तु तत्सन्निहितं सन्निधिश्च पुरुषस्य न देशतः का
लतो वा तदसंयोगात् किंतु योग्यतालक्षणोस्ति च पुरुषस्य भोक्तृशक्तिश्चित्तस्य भोग्यशक्तिः तदुक्तं दृश्यत्वेनेति शब्दाद्याकारपरिणतस्य भोग्यत्वेनेत्यर्थः भोग

कथं तर्हि दर्शितविषयत्वात् ३ वृत्तिसारूप्यमितरत्र ४ चित्तमयस्कांतमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वं भ
वति पुरुषस्य स्वामिनः तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिः संबंधो हेतुः ॥

अथ यद्यपि शब्दाद्याकारा वृत्तिश्चित्तस्य धर्मस्तथापि चित्तचेतनयोरभेदसमारोपाद् वृत्तिसारूप्यं पुरुषस्योक्तं। तस्माच्चित्तेनासंयोगेपि तज्जनितोपकारभागि
ता च पुरुषस्यापरिणामिता चेति सिद्धं ननु स्वस्वामिसंबंधो भोगहेतुरविद्यानिमित्तो ऽविद्या तु किंनिमित्ता न खलु निर्निमित्तं कार्यमुत्पद्यते यथाहुः स्वप्राद्विवद्विद्या
याः प्रवृत्तिस्तस्य किंकृतेति शंकामुपसंहारव्याजेनाह इति तस्माच्चित्तवृत्तिबोधे शांतघोरमूढाकारचित्तवृत्तिरूपभोगे नाद्यविद्यानिमित्तत्वादनादिः संयोगो हेतुः।
अविद्यावासनयोश्च समानो बीजांकुरसंतानवदनादिरिति भावः ॥

स्यादेतत् पुरुषो हि शक्य उपदिश्यते न च वृत्तिनिरोधो वृत्तीरविज्ञाय शक्यो न च सहस्रेणापि पुरुषायुषैरलमिमाः काश्चित्परिगणयितुमसंख्याताश्च कथं निरोद्धुमित्याशंक्य
तासामियत्तास्वरूपप्रतिपादनपरं सूत्रमवतारयति। ताः पुनर्निरोद्धव्या बहुत्वे सति चित्तस्य। वृत्तयः पंचतय्यः क्लिष्टा अक्लिष्टाः। वृत्तिरूपेण वृत्तय एकस्तु सप्रमाणादिरूपेणावयवाः पंच
ततस्तद्रूपावयवा पंचतयापंचावयवा वृत्तिर्भवति। ताश्च वृत्तयश्चैत्रमैत्रादिविचित्रभेदाद् बह्व्य इति बहुवचनमुपपन्नं एतदुक्तं भवति चैत्रो वा मैत्रो वा न्यो वा कश्चित् सर्वेषामेव तेषां
वृत्तयः पंचतय्य एव नाधिका इति। चित्तस्येति चैकवचनं ज्ञातमभिप्रायं चित्तानामिति द्रष्टव्यं तासामवांतरविशेषमनुष्ठानोपयोगिनं दर्शयति क्लिष्टा अक्लिष्टा इति अ-

ताः पुनर्निरोद्धव्याः बहुत्वे सति चित्तस्य ५ वृत्तयः पंचतय्यः क्लिष्टाक्लिष्टाः क्लेशहेतुकाः
कर्माशयप्रचयक्षेत्रीभूताः क्लिष्टाः १२

अक्लिष्टानुपादेया क्लिष्टा निरोद्धव्या स्ता अपि परं वैराग्येणेति तत्र स्वव्याख्यानं क्लेशहेतुका इति क्लेशा अस्मितादयो हेतवः प्रवृत्तिकारणं यासां वृत्तीनां तास्तथोक्ताः
यद्वा पुरुषार्थप्रधानत्वरजस्तमोमयीनां हि वृत्तीनां क्लेशकारणत्वेन क्लेशापेवस्मृति: क्लेशः क्लिष्टता तदा सामस्तीति क्लिष्टा इति यत एव क्लेशोपार्जनार्थमभूणां प्रवृ-
त्तिरत एव कर्माशयप्रचयक्षेत्रीभूताः प्रमाणादिना स्वव्यंग्यप्रतिपतार्थमवसाय तत्रैव सक्तो द्विष्टो वा कर्माशयमाचिनोतीति मद्वृत्तिधर्माधर्मप्रचयप्रसवभूमयो वृत्तयः क्लि-
ष्टा इति १२

अक्लिष्टा व्याचष्टे ख्यातिविषया इति। विधूतरजस्तमसो बुद्धिसत्त्वस्य प्रशांतवाहिनः प्रज्ञाप्रसादः ख्यातिस्तथा विषयिणी तद्विषयं सत्त्वपुरुषविवेकमुपलक्षयति तेन स
त्वपुरुषविवेकविषया वृत्तो अत एव गुणाधिकारविरोधिन्यः कार्यारंभणं हि गुणानामधिकारो विवेकख्यातिपर्यवसानं च तद्धि चरितो धिकाराणां गुणानामधिकारं
निरुंधंतीति अप्रमत्ता अक्लिष्टाः प्रमाणप्रभृतयो वृत्तयः स्यादेतत् वीतरागजन्मादर्शनात् क्लिष्टत्वय एव सर्वे प्राणभृतो न च क्लिष्टवृत्तिप्रवाहे भवितुमर्हत्य क्लिष्टावृत्तयो न चा
रूपंभावेपि कार्यकारिता विरोधिमध्यपातित्वात् तस्मात् क्लिष्टा नाम क्लिष्टाभिर्निरोधस्तासां च वैराग्येणेति मनोरथमात्रमित्यत आह क्लिष्टप्रवाहेति आगमानुमानाचा

ख्यातिविषया गुणाधिकारविरोधिन्यो ऽक्लिष्टाः क्लिष्टप्रवाहपतिता अप्यक्लिष्टाः क्लिष्टच्छिद्रेष्वप्यक्लिष्टा भवंति अक्लिष्टच्छिद्रेषु क्लिष्टा इति तथा
जातीयकाः संस्काराः वृत्तिभिरेव क्रियंते संस्कारैश्च वृत्तय इत्येवं वृत्तिसंस्कारचक्रमनिशमावर्त्तते तदेवंभूतं चित्तमवसिताधिकारमात्मकल्पेन व्यवतिष्ठते प्रल

र्योपदेशपरिशीलनलब्धजन्मनो ऽभ्यासवैराग्ये क्लिष्टच्छिद्रमंतरा तत्र पतिताः स्वरूपमक्लिष्टा एव यद्यपि क्लिष्टप्रवाहपतिताः न खलु शाल ((यं वा गच्छतीति १२
ग्रामे किरातशतसंकीर्णे प्रतिवसन्नपि ब्राह्मणः किरातो भवति अक्लिष्टच्छिद्रेष्विति निदर्शनं क्लिष्टांतरवर्त्तिनया च क्लिष्टाभिरनभिभूता अक्लिष्टाः स्वसंस्कारपरिपाक
क्रमेण क्लिष्टा एव तावदभिभवंतीत्याह तथाजातीयका इति अक्लिष्टाभिर्वृत्तिभिः क्लिष्टाः संस्काराः इत्यर्थः तदिदं वृत्तिसंस्कारचक्रमनिशमावर्त्तते ॥ आ निरोधसमाधेः त
देवंभूतं चित्तं निरोधावस्थं संस्कारशेषंभूतात्मकल्पेनावतिष्ठति रत्यापाततः प्रलयं वा गच्छतीति परार्थतः १३

मैं

पा·टी०
७

पिंडीकृतसूत्रार्थमाह ता इति पंचतयेत्यर्थकथनमात्रं न तु शब्द इति व्याख्यानं तत्पयः प्रकारे स्मरणान्त ताः संज्ञामिह दर्शयति प्रमाणविपर्ययविकल्पनिद्रास्मृतयः निर्देशेय
था वचनं विग्रहश्चार्थे द्वंद्वः समासः इतरेतरयोगे यथा निशाभुचि दुःखानात्मसु निक्षस्तभुचि सुखात्मख्यातिर विद्येत्युक्तेपि न दिङ्मोहालातचक्रादि विभ्रमाव्युदस्यते एवमि
हापि प्रमाणाद्यभिधाने पि व्यंतरसदृशवशेकान व्युदस्यते ति निरासाय वृत्त्यंपंचतय्य इति एतावत्स एवहतयो नापराः सतीतिदर्शितं भवति तत्र प्रमाणात्रिविधमनूद्य सामा
न्यलक्षणमाह प्रत्यक्षानुमानागमाः प्रमाणानि अनधिगततत्त्वबोधः पौरुषेयो व्यवहारहेतुः प्रमा तत्करणं प्रमाणं विभागवचनं न्यूनाधिकसंख्याव्यवच्छेदार्थं तत्र प्रमक
लं प्रमाणमत्रत्वात्प्रथमतः प्रत्यक्षं लक्षयति इंद्रियेति अर्थस्येति समारोपितत्वं निषेधति तद्विषयेति बाह्यगोचरतया ज्ञानाकारगोचरत्वं निवारयति विज्ञानवादिनोज्ञानाकारस्यवा
ह्याज्ञेयसंबंधं दर्शयति बाह्यवस्तूपरागादिति व्यवहितस्य तदुपरागे हेतुमाह इंद्रियेति कयेति सामान्यमात्रमर्थ इत्येके विशेषा एवेत्यपरे तान्प्रत्येसामान्यविशेषतद्वतां इत्यपरे वादिनः

ताः क्लिष्टाश्चाक्लिष्टाश्च पंचधा वृत्तयः ५ प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ६ तत्र प्रत्यक्षानुमानागमाः प्रमाणानि इंद्रियप्रणालिकया चित्तस्य बाह्यवस्तू
परागात् तद्विषया सामान्यविशेषात्मनोर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणं फलमविशिष्टः पौरुषेयः चित्तवृत्तिबोधः प्रतिसंवेदी पुरुष इत्युपरि
प्रतिपन्नास्तन्निरासायाह सामान्यविशेषात्मान इति नतद्वता किं तु तादात्म्यमर्थस्य तत्रैकांतानभ्युपगम इत्यत्र प्रतिपादयिष्यते अनुमाना (ष्टा)दुपपादयिष्यामः ७
गमविषयात्प्रत्यक्षविषयस्य वच्छिनत्ति। विशेषावधारणप्रधानेति यद्यपि सामान्यमपि प्रत्यक्षे प्रतिभासते तथापि विशेषं प्रत्युपसर्जनीभूतमित्यर्थः। तदेतत्साक्षात्कारोपल
क्षणपरं तथा च विवेकख्यातिरविलक्षिता भवति फलविप्रतिपत्तिं निराकरोति फलमिति पौरुषेय इति चित्तवृत्तिबोध इति नन्वपुरुषवर्ती बोधः कथं चित्तगतायाः वृत्तेः फलं नहि खदि
रगोचरव्यापारेण परशुना पलाशे छिदाक्रियते इत्यत आह अविशिष्ट इति नहि पुरुषगतो बोधो जन्यते अपितु चैतन्यमेव बुद्धिदर्पणे प्रतिबिंबितं बुद्धिवृत्त्यार्थाकारया तद
दाकारतामापद्यमानं फलं तच्च तथाभूतं बुद्धेर्विशिष्टं बुध्यात्मकं वृत्तिभिर्बुद्ध्यात्मिकेति समानाधिकरणाद्युक्तं प्रमाणफलभाव इत्यर्थः। एतच्चोपपादयिष्यामइत्याहप्र

७

प्रत्यक्षानंतरं प्रवृत्त्यादिलिंगकप्रोक्तबुद्ध्यानुमानप्रभवसंसबंधदर्शनसमुत्पन्नतयागमस्यानुमानजत्वादनुमितस्य चागमेनाख्यानादागमात्प्रागनुमानं
लक्षयति अनुमेयस्येति जिज्ञासितत्वधर्मविशिष्टो धर्मी तु प्रेयस्तस्य तुल्यजातीयाः साध्यधर्मसामान्येन समानार्थाः सपक्षास्तेषु तुवृत्त उत्पन्नेन विरुद्धत्वमसाधारणत्वं च सा
धनधर्मस्य निराकरोति भिन्नजातीयाश्च सपक्षास्ते च सपक्षदन्येन हि रुद्धास्तदभाववंतश्च तेभ्यो व्यावृत्तस्तदनेनसाधारणानैकांतिकत्वमपाकरोति संबध्यत इति संब
द्धो लिंगं अनेन पक्षधर्मतां दर्शयन्नसिद्धतां निवारयति तद्विषयातान्निबंधनाभिन्नबंधनं तस्मात् द्विपपदव्युत्पत्तेः सामान्यबधारणेति प्रत्यक्षविरियाद्यवद्धिन्नमित्र
संबंधसंवेदनाधानजन्मानुमानविशेषेषु संबंधग्रहणाभावेन सामान्यमेव सुकरसंबंधग्रहणं गोचरयतीति उदाहरणमाह यथेति चो हेत्वर्थे विंध्योगतिर्यतस्तस्मात्रस्याप्र

अनुमेयस्य तुल्यजातीयेष्वनुवृत्तो भिन्नजातीयेभ्यो व्यावृत्तः संबंधो यः तद्विषया सामान्यावधारणप्रधाना वृत्तिरनुमानं यथा देशांतरप्राप्तेर्गतिमच्चंद्रता
रकं चैत्रवत् विंध्यश्चाप्राप्तिरगतिः आप्तेन दृष्टोनुमितो वार्थः परस्य स्वबोधसंक्रांतये शब्देनोपदिश्यते शब्दात् तदर्थविषया वृत्तिः श्रोतुरागमः यस्याश्रद्धेयार्थो वक्ता
न दृष्टानुमितार्थः स आगमः प्लवते मूलवक्तरि तु दृष्टानुमितार्थे निर्विप्लवः स्यादिति ७

प्राप्तिरतो गतिनिवृत्तौ प्राप्तेर्निवृत्तिर्देशांतरप्राप्तेर्गतिमच्चंद्रतारकं चैत्रवदिति सिद्धिः आगमस्य वृत्तेर्लक्षणमाह आप्तेनेति तत्त्वदर्शनकारुण्यकरणपाटवाभिसंबंध आप्ति
स्तया वर्तत इत्याप्तस्तेन दृष्टोनुमितो वार्थः श्रुतस्याप्यागमानुपादानं तस्य दृष्टानुमितमूलत्वेन ताभ्यामेव चरितार्थत्वात् आप्तचित्तवर्तिज्ञानसदृशज्ञानस्य श्रोतृचित्ते समुत्पादः
स्वबोधसंक्रांतिस्तस्यै अर्थ उपदिश्यते श्रोतृहितप्राप्तिपरिहारोपायप्रज्ञाप्यते शेषं सुगमं यस्यागमस्याश्रद्धेयार्थो वक्ता यथाप्यामेव दश दाडिमानि तानि षट् पूपा भ
विष्यतीति न दृष्टानुमितार्थो यथा वेदे ते स्वर्गकामा इति स आगमः प्लवते नन्वेवं मन्वादीनामप्यागमः प्लवेत न हि ते पि दृष्टानुमितार्था यथाहुः यः कश्चित्कस्यचिद्धर्मो म
नुना परिकीर्तितः स सर्वोभिहितो वेदे सर्वज्ञानमयो हि सः इत्यत आह मूलवक्तरि त्विति मूलवक्ता हि तत्रेश्वरो दृष्टानुमितार्थः ७

पा॰टी॰
८

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं विपर्ययपदमिति लक्ष्यनिर्देशो मिथ्याज्ञानमित्यादिलक्षणं यत् ज्ञानप्रतिभासिरूपं तद्रूपाप्रतिष्ठमतद्रूपप्रतिष्ठं यथा शुक्ताभोजीतिअतः
संशयोपि संगृहीतः एतावांस्तु विशेषः तत्र ज्ञानारूढे वाप्रतिष्ठता द्विचन्द्रादेस्तु बाधज्ञानेन ननु एवं विकल्पोपि तद्रूपाप्रतिष्ठो नाद्विचारतो विपर्ययः प्रसज्येतेत्यत आह मिथ्यान
मितिअनेन हि सर्वजनीनानुभवसिद्धो बाध उक्तः स चास्ति विपर्यये न तु विकल्पे तेन व्यवहारान्पण्डितरूपाणामेव तु विचारपतान्तत्र बाधबुद्धेरिति चोदयति स कस्मान्न प्रमा

विपर्ययो मिथ्यानमतद्रूपप्रतिष्ठं स कस्मान्न प्रमाणं यतः प्रमाणेन बाध्यते भूतार्थविषयत्वात्प्रमाणस्य २६

णं नोत्तरेणोपजातविरोधिना ज्ञानेन एवं बाधनीयमपि तु पूर्वेणैव प्रथममनुपजातेनानुपजातविरोधिनापरमिति भावः परिहरति यतः प्रमाणेनेति यत्र हि पूर्वापेक्षापरोत्पत्ति
स्तत्रैवं हेतुत्वकारणाद्न्योन्यानपेक्षे ज्ञाने जायेते तेनोत्तरस्य पूर्वमनुपमृद्योदयमनासादयतस्तदुपबाधात्मैवोदयो न तु पूर्वस्यान्तरधात्मलाभस्तदानीमप्रसक्तेस्तस्मादनुपजा
तविरोधिता बाध्यत्वहेतुरुपजातविरोधिज्ञानं बाधकत्वेन तस्माद्भूतार्थविषयत्वात्प्रमाणेनाप्रमाणस्य बाधनं सिद्धं २६

उदाहरणमाह तत्र प्रमाणेनेति अस्य कुत्सितत्वं हानाय दर्शयति सेयं पंचपर्वेति अविद्यासामान्यमविद्यास्मितादिषु पंचसु पर्वसु स्थितमित्यर्थः अव्यक्तमहदहंकारपंचतन्मात्रेष्वष्
स्वनात्मस्वात्मबुद्धिरविद्यातम एवं योगिनामष्टसु अणिमादिके ऐश्वर्येष्वष्टेयः स्वीयो बुद्धिरष्टविधो मोहः एवं स्माज्जघनः स्मवास्मितोच्यते । तथा योगेनाष्टविधमैश्वर्यमुपा
दयतिष्ठामस्ताव दृष्टानुश्रविकान्शब्दादीन्दश विषयान् भोक्ष्यइत्येवमात्मिकामतिः । निर्ममहामोहो रागः एवमेते नैवामिसंधिनाप्रवर्त्तमानस्य केन चित्स्मितिवद्भूतादरी ।

तत्र प्रमाणेन बाधनमप्रमाणस्य दृष्टं यथा द्विचंद्रदर्शनं सद्विषयेणैकचंद्रदर्शनेन बाध्यत इति सेयं पंचपर्वा
भवत्यविद्या अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा इति एतत्स्वसंज्ञाभिस्तमो मोहो महामोहस्तामिस्रो ह्यं
धतामिस्र इति एते चित्तमलस्य संगेनाभिध्यस्त १७

मायामनुसतीन त्रिबंधनस्य दृष्टानुश्रविकविषयोपभोगस्याभिद्वेतत्प्रतिबंधक विषयः क्रोधः सतामिस्राख्यो द्वेषः एवमणिमादिषु रागसंपत्तौ दृष्टानुश्रविकविषय
प्रत्युपस्थाने चकल्पांते सर्वमेतत्त्रंसनीतिय स्त्रासः सोऽभिनिवेशोऽधन्तामिस्रः तदुक्तं भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः तामिस्रोऽष्टादशधा तथा भवत्यं
धतामिस्र इति १७

पा॰टी॰ ९

शब्दज्ञानानुपातीवस्तुशून्योविकल्पः ननुशब्दज्ञानानुपातीचेदागमप्रमाणांतर्गतोविकल्पःप्रसज्येतनिर्वस्तुकत्वेवाविपर्ययःस्यादित्यतआहसनेति एतदुक्तंभवतिक्वचिद भेदेभेदमारोपयतिक्वचित्तुअभिन्नानामभेदंततोभेदस्यानप्रमाणविपर्ययांतर्गतः कस्मात्यतोवस्तुशून्यत्वेपीतिप्रमाणांतर्गतिंनिषेधतिशब्दज्ञानमाहात्म्यनिबंधइति विपर्ययांतर्गतिं एतदुक्तंभवति क्वचिद्भेदेभेदमारोपयतिक्वचित्तुनाभिन्नानामभेदंततोभेदस्याभेदस्यचवस्तुनोभावात्तदाभासोविकल्पोनप्रमाणंनापि विपर्ययोव्यवहा

शब्दज्ञानानुपातीवस्तुशून्योविकल्पः सनप्रमाणोपारोहीनविपर्ययोपारोही वस्तुशून्यत्वेपिशब्दज्ञानमाहा
त्म्यनिबंधनोव्यवहारोदृश्यते तद्यथाचैतन्यंपुरुषस्यस्वरूपमितियदाचितिरेवपुरुषस्तदाकिमत्रकेनव्यपदिश्यते
भवतिचव्यपदेशेवृत्तिःयथाचैत्रस्यगौरिति ९

णविसंवादादितिशास्त्रप्रसिद्धमुदाहरणमाहतद्यथेति किंविशेष्यंकेनव्यपदिश्यतेविशेष्यतेन्याभेदेविशेषणविशेष्यभावोनहिगवागोर्विशेष्यतेकिंतुभिन्नेनचैत्रेणातदि ९
दमाहभवतिचव्यपदेशेवृत्तिःव्यपदेश्यव्यपदेशकयोर्भावोव्यपदेशःविशेषणविशेष्यभावइतियावत् तस्मिन्वृत्तिर्विकल्पस्य यथाचैत्रस्यचैत्रस्यगौरिति ९

शास्त्रीयमेवोदाहरणांतरं समुच्चिनोति तथेति प्रतिषिद्धो वस्तुनः पृथिव्यादेर्द्रव्यतः परिस्पंदो यस्य सतथोक्तः कोसौ निःक्रियः पुरुषः नरवत्तु सांख्यीयेराख्यातेऽभावोनाम कश्चिदस्ति
धर्मो येन पुरुषो विशेष्येतेत्यर्थः हुक्रियत्वात् प्रतिषिद्धा वस्तुधर्मा इतितस्यार्थः प्रतिषेध्याः प्रतिषिद्धानवस्तुधर्मा गम्यन्ते भावाभावयोरसंबंधात् अथ च तथा प्रतीतिरिति
लौकिकमुदाहरणमाह निवृत्तिचारणाइति यथाहि पचति भिक्षामनेन रूपे विरीभूतः कर्मक्षणात् प्रयपरक फलावच्छिन्नः प्रतीयते एवं निवृत्ती सत्यामपि पूर्वापरीभावमेवाह स्थास्यति स्थित

तथा प्रतिषिद्धवस्तुधर्मा निःक्रियः पुरुषः निवृत्तिकारणाः स्थास्यति स्थित इति गतिनिवृत्तौ धात्व
र्थमात्रं गम्यते तथानुत्पत्तिधर्मा पुरुष इति उत्पत्तिधर्मस्याभावमात्रमेव गम्यते न पुरुषान्वयी
धर्मः तस्माद्विकल्पितः स धर्मस्तेन चास्ति व्यवहार इति ११

इति ननु भवतु पाकवत् पाकवत् पूर्वापरीभूतपाकस्थानक्रियया वाणभिन्नया वाणास व्यपदेश इत्यत आह । गतिनिवृत्तौ धात्वर्थमात्रं गम्यते गतिनिवृत्तिरेव तावत्कल्पिता
त् सा च विभावरूपत्वं तेनापि पूर्वापरीभावरहितो कल्पनाधारं परेत्यर्थः अभावः कल्पितो भावइवानुगत एव सर्वपुरुषेषु गम्यते न पुनः पुरुषव्यतिरिक्तो धर्मः कश्चित्कश्चिदित्यु
दाहरणान्तरमाह तथानुत्पत्तिधर्मेति यमाणविपर्यासाभ्याम् स्थानविकल्पवृत्तिरिति वादिनोव्यवहारः प्रादुर्भवति तत्पत्ति बोधनयोदाहरणप्रपंच इति मन्तव्यं ११

पा॰टी॰ अभावप्रत्ययालंबना वृत्तिर्निद्रा। अधिकृतं हि वृत्तिपदमनुवादकं प्रमाणविपर्ययविकल्पस्मृतीनां वृत्तित्वं प्रतिपरीक्षकाणामविप्रतिपत्तेरतस्तदनूद्यते विशेषविधानाय निद्रा-
१० यां तु वृत्तित्वे परीक्षकाणामस्ति विप्रतिपत्तिरिति वृत्तित्वं विधेयं न च प्रकृतमनुवादकं विधानाय कल्प्यत इति पुनर्वृत्तिग्रहणं जाग्रत्स्वप्नवृत्तीनामभावस्तस्य प्रत्ययः कारणं बुद्धि-
सत्वाच्छादकं तमस्तदेवालंबनं विषयो यस्याः सा तथोक्ता वृत्तिर्निद्रा बुद्धिसत्वे हि त्रिगुणे यदा सत्वरजसी अभिभूय समस्तकरणावरकं तम आविरस्ति तदा बुद्धेर्विषयाकारपरिणामा-
भावादुद्भूततमोमयां बुद्धिमवबुध्यमानः पुरुषः सुषुप्तोऽन्तःसंज्ञ इत्युच्यते केचित्तु निरूढकैवल्ययोरविलक्षणभावरत्न निद्रेति तत आह सा च संबोधे प्रत्यवमर्शात् सोऽयमुपपत्तिकालस्-
स्मरणात्प्रत्ययविशेषः कथं यदा हि सत्वसचिवं तमआविरस्ति तदेदृशः प्रत्यवमर्शः सुप्तोत्थितस्य भवति सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां मे विशारदीकरोति स्वच्छीकरोतीति यदा तु र-

अभावप्रत्ययालंबना वृत्तिर्निद्रा सा च संप्रबोधे प्रत्यवमर्शात्प्रत्ययविशेषः कथं सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां मे विशारदीकरोति दुःखमहमस्वाप्सं
स्त्यानं मे मनो भ्रमत्यनवस्थितं गाढं मूढोहमस्वाप्सं गुरूणि मे गात्राणि क्लान्तं मे चित्तं अलसं मुषितमिव तिष्ठतीति स खल्वयं प्रबुद्धस्य प्रत्यवमर्शो न स्यात्
असति प्रत्ययानुभवे तदाश्रिताः स्मृतयश्च तद्विषया न स्युः तस्मात्प्रत्ययविशेषो निद्रा सा च समाधावितरप्रत्ययवन्निरोद्धव्येति १०

जःसचिवं तमआविरस्ति तदेदृशः प्रत्यवमर्श इत्याह दुःखमहमस्वाप्सं स्त्यानमकर्मण्यं मे मनः कस्माद्यतो भ्रमत्यनवस्थितं नितां मिश्रितरजः सत्वे तमसः समुल्लासे सायं प्रबुद्धस्य १०
प्रत्यवमर्शमाह गाढं मूढोहमस्वाप्सं गुरूणि मे गात्राणि क्लान्तं मे चित्तं अलसं मुषितमिव तिष्ठतीति साध्यव्यतिरेके हेतुव्यतिरेकमाह स खल्वयमिति प्रबुद्धस्य प्रबुद्धमात्रस्य तदाश्रिताश्चे-
ति बोधकाले प्रत्ययानुभवे वृत्त्यभावकारणानुभवे इत्यर्थः ननु प्रमाणादयो युक्ता न चित्ताधिकरणाः निरोद्धव्यास्तास्समाधिप्रतिपक्षत्वान्निद्रायाः कास्मद्वृत्तिमतुल्यायाः कथं समाधिप्रति-
पक्षतेत्यत आह सा च समाधाविति एकाग्रस्त्यापि तामसत्वेन निद्रा सबीजनिर्बीजसमाधिप्रतिपक्ष इति सापि निरोद्धव्येत्यर्थः १०

अनुभूतविषयासंप्रमोषः स्मृतिः प्रमाणादिभिरनुभूते विषये योसंप्रमोषोऽस्तेयः सा स्मृतिः संस्कारमात्रजस्य हि नास्य संस्कारकारणानुभवावभासिनो विषय आत्मीयत्तदधि
कविषयपरिग्रहस्तु संप्रमोषस्तेयः कस्मात् सादृश्यात् मुष स्तेय इत्यस्मात् प्रमोषपदस्युत्पत्तेः एतदुक्तं भवति सर्वे प्रमाणादयोऽनधिगतमर्थं सामान्यतः प्रकारतो वाऽधिगमयन्ति
स्मृतिः पुनर्न पूर्वानुभवमर्यादामतिक्रामति तद्विषया तदूनविषया वा न तु तदधिकविषया सोयं वृत्त्यन्तराद्विशेषः स्मृतेरिति विमृशति किं प्रत्ययस्येति ग्राह्यस्य वा तत्त्वादनु

अनुभूतविषयासंप्रमोषः स्मृतिः किं प्रत्ययस्य चित्तं स्मरति आहोस्वित् विषयस्येति
ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासः तथाजातीयकं संस्कारमारभते
स संस्कारः स्वव्यंजकांजनः तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति ११

भवस्यानुभूतत्वाभावात्तज्जः संस्कारो ग्राह्यमेव स्मारयतीति भाति अनुभवमात्रजनितत्वाच्चानुभवमेवेति विमर्शयोपपत्तितउपस्मरणमवधारयति ग्राह्योपरक्तः परमार्थत
स्तु ग्राह्योपरक्तः परमार्थतस्तु ग्राह्यग्रहणे उभयं तयोराकारस्वरूपे निर्भासयति प्रकाशयति स्वव्यंजकं कारणमंजनमारोपयत्तथोक्तः स्वकारणाकारस्पर्श ११

पा॰टी॰ ११

ननु यदि कारणाविचारेण बुद्धिस्मरणयोः सारूप्यं कस्तर्हि भेद इत्यत आह तत्र ग्रहणेति ग्रहणमुपादानं तच्च गृहीतस्यैवात्स्वोपादानसमवतितद्वेनानधिगतबोधनं बुद्धिरित्युक्तं ग्रह
णाकारो ग्रहणरूपं तद्वै प्रधानं यस्याः सा तथोक्ता विकल्पितश्चायं भेदेपि बुद्धौ ग्रहणेन गुणप्रधानभावइतिग्राह्याकारः एव प्रथमो यस्याः सा तथोक्ता इदमेव च ग्राह्याकारस्य ग्राह्य
स्यरूपत्वं यद्रस्मन्तरविषयीकृततत्समर्थस्य तदनेन च स्मृतेर्विषयाहृतगोचरा स्मृतिरित्युक्तं भवति सोयमसंप्रमोषपरतिनच स्तिस्मृतेरपि प्रमोषः दर्शयति पिवादेरतीतस्यदेशका

तत्र ग्रहणाकारपूर्वा बुद्धिः ग्राह्याकारपूर्वा स्मृतिः सा च द्वयी भावितस्मर्त्तव्या ऽभावितस्मर्त्तव्या च स्वप्ने भावितस्मर्त्तव्या जाग्रत्समये त्वभावितस्म
र्त्तव्येति सर्वाश्चैताः स्मृतयोः प्रमाणविपर्ययविकल्पनिद्रास्मृतीनामनुभवात्प्रभवन्ति सर्वाश्चैता वृत्तयः सुखदुःखमोहात्मिकाः सुखदुःखमोहा
श्च क्लेशेषु व्याख्येयाः सुखानुशयी रागः। दुःखानुशयी द्वेषः मोहः पुनरविद्येति एताः सर्वा वृत्तयो निरोद्धव्याः आसां निरोधे संप्रज्ञातो वा समाधिर्भवति
॥ असंप्रज्ञातो वा इति ११॥

लांतराभ्यन्तरचरदेशकालांतरसंबंधं स्मर इत्यत आह साच द्वयीति भावितः कल्पितः स्मर्त्तव्यो यया तथोक्ता अभावितो कल्पितः पारमा
र्थिक इति यावत् तेनेयं स्मृतिस्तु विपर्ययस्तल्लक्षणोपपन्नत्वात्तु स्मृत्याभासत्वात्तु स्मृतिरुक्ता प्रमाणाभासमिव प्रमाणमिति भावः कस्मात्पुनः तेनैतेरूपन्यास इत्यत आह स ११
र्वाः स्मृतय इति अनुभवः प्राप्तिः प्राप्तिपूर्वा वृत्तिः स्मृतिः ततः स्मृतीनामुपजनन इत्यर्थः ननु पुरुषक्लिष्टान्तिते निरोद्धव्याः प्रेक्षावतां क्लेशाच्च तथा न च वृत्तयस्तत्किमर्थमासां
निरोध इत्यत आह सर्वाश्चैता इति सुगमं २

निरोधोपायं पृच्छति अथैनि सूत्रेणोत्तरमाह अभ्यासवैराग्याभ्यां तन्निरोधः अभ्यासवैराग्ययोर्निरोधे जनयितव्ये अवांतरव्यापारभेदेन समुच्चयो नतुकल्प इत्याह चित्तनदीतिप्रा
ग्भारः प्रबंधः निम्नजा गंभीरता अगाधते निपावत् तत्राभ्यासस्य स्वरूपप्रयोजनाभ्यां लक्षणमाह तत्र स्थितौ यत्नोऽभ्यासः तथा च वृत्ति चित्तस्यात् तिकस्य राजसतामस वृत्तिरहितस्य प्रशां
तवाहिता विमलता सात्विकवृत्तिवाहितैकाग्रता स्थितिः तदर्थ इति स्थिता विनिमित्त सप्तमी व्याख्याता यथा चर्म्मणि द्वीपिनं तिप्रयत्नमेव पर्यायाभ्यां विशदयति वीर्यमुत्साह इति

अथासां निरोधे क उपाय इति १० अभ्यासवैराग्याभ्यां तन्निरोधः चित्तनदी नामोभयतोवाहिनी वहति कल्याणाय वहति पापाय च या तु कैवल्यप्राग्भारा विवेकवि
षयनिम्ना सा कल्याणवहा संसारप्राग्भारा अविवेकविषयनिम्ना पापवहा तत्र वैराग्येण विषयस्रोतः खिलीक्रियते विवेकदर्शनाभ्यासेन विवेकस्रोत उद्घाट्यते इत्युभया
धीनश्चित्तवृत्तिनिरोधः ११ तत्र स्थितौ यत्नोऽभ्यासः चित्तस्यावृत्तिकस्य प्रशांतवाहिता स्थितिः तदर्थः प्रयत्नो वीर्यमुत्साहः तत्संपिपादयिषया तत्साधनानुष्ठानमभ्यासः
भ्यासः १२ स तु दीर्घकालनैरंतर्यसत्कारासेवितो दृढभूमिः दीर्घकालासेवितः निरंतरासेवितः तपसा ब्रह्मचर्येण विद्यया श्रद्धया च संपादितः सत्कारवान् दृढभू
मिर्भवति व्युत्थानसंस्कारेण द्रागित्येवानभिभूतविषय इत्यर्थः १२ १३

तस्येच्छायोनितामाह तत्संपिपादयिषया तद्दिति स्थितिं परामृशति प्रयत्नस्य विषयमाह तत्साधने ति स्थितिसाधनान्यंतरंगबहिरंगाणि यमनियमादीनि साधनगोचरः कर्तृव्या
पारो न फलगोचर इति ननु व्युत्थानसंस्कारेणानादिना परिपंथिना प्रतिबद्धोऽभ्यासः कथं स्थिमैकल्पेत इत्यात आह स तु दीर्घकालनैरंतर्यसत्कारासेवितो दृढभूमिः अयम
भ्यासो विशेषणत्रयसंपन्नः सन् दृढावस्थो न सहसा व्युत्थानसंस्कारैरभिभूतस्थितिस्वविषयो भवति यदि पुनरेवंभूतमप्यभ्यासं हित्वोपरमेत ततः कालपरिवृत्तिनाभिभूयेत तस्मा
न्नोपरंतव्यमिति भावः १३

पा॰टी॰ वैराग्यमाह दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यं चेतनाचेतनेषु दृष्टविषयेषु वितृष्णतीमाह स्त्रियइति ऐश्वर्यमाधिपत्यं अनुश्रवो वेदस्ततोधिगता आनु-
१२ श्रविकाः स्वर्गादिषु तत्रापि वितृष्णस्याह स्वर्गेति देहरहिता विदेहाः करणेषु लीनास्तेषां भावो वैदेह्यं अन्ये तु प्रकृतिमेवात्मानमभिमन्यमानाः प्रकृत्युपासकाः प्रकृतौ साधि-
कारायामेव लीनास्तेषां भावः प्रकृतिलयत्वं तत्प्राप्तिविषये आनुश्रविकविषये वितृष्णस्य आनुश्रविकविषये वितृष्णस्य आनुश्रविकविषये वितृष्णो हि स्वर्गादिप्राप्तिविषये वि-
तृष्ण उच्यते ननु यदि वितृष्णमात्रं वैराग्यं हन्त विषयाप्राप्तावपि तद्दृष्टीव वैराग्यं स्यादित्यत आह दिव्यादिव्येति न वितृष्णमात्रं वैराग्यं अपितु दिव्यादिव्यविषयसंप्रयोगेपि चित्त-
स्यानाभोगात्मिका तामेव स्पष्टयति हेयोपादेयशून्या आसंगद्वेषरहिता उपेक्षाबुद्धिर्वशीकारसंज्ञा कुतः पुनरियमित्यत आह प्रसंख्यानबलादिति तापत्रयपरीततविषया-

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यं स्त्रियोऽन्नपानमैश्वर्यमिति दृष्टविषये वितृष्णस्य स्वर्गवैदेह्यप्रकृतिलयत्वप्राप्तावानुश्रविकविषये वितृष्णस्य दिव्यादिव्यविषयसंप्रयोगेऽपि चित्तस्य विषयदोषदर्शिनः प्रसंख्यानबलात् अनाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञा वैराग्यं १५

णां दोषस्तत्परिभावनं पानं तत्साक्षात्कारः प्रसंख्यानं तद्बलादित्यर्थः यतमानसंज्ञा एकेन्द्रियसंज्ञा वशीकारसंज्ञा चेति चेतस्वः संज्ञा त्यागमिनः रागादयः खलु कषायाश्चित्तवर्तिनस्तैरिन्द्रियाणि यथास्वं विषयेषु प्रवर्त्यन्ते तन्मा प्रवर्तिषतेन्द्रियाणि तत्तद्विषयेष्विति तत्परिपाचनाय आरंभः प्रयत्नः सा यतमानसंज्ञा तदारंभे सति केचित्कषायाः पक्काः पच्यन्ते पक्ष्यंते च केचिदित्यत्र पच्यमानेभ्यः पक्कानां व्यतिरेकावधारणं व्यतिरेकसंज्ञा इन्द्रियप्रवर्तनासमर्थतया पक्कानामौत्सुक्यमात्रेण मनसि व्यवस्थानमेकेन्द्रियसंज्ञा औत्सु- १२
क्यमात्रस्यापि निवृत्तिरुपस्थितेष्वपि दिव्यादिव्यविषयेषूपेक्षाबुद्धिः संज्ञात्रयात्परा वशीकारसंज्ञा एतयैव च पूर्वासां चरितार्थत्वान्न ताः पृथगुक्ता इति सर्वमवदातं १५

अपरं वैराग्यमुक्त्वा परमाह। तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं। अपरवैराग्यस्य परं वैराग्यं प्रति कारणत्वं तत्र च द्वारमादर्शयति दृष्टानुश्रविकविषयदोषदर्शी विरक्त इति। अनेन
अपरं वैराग्यं दर्शितं। पुरुषदर्शनाभ्यासादागमानुमानाचार्योपदेशसमधिगतस्य पुरुषस्य दर्शनं तस्याभ्यासः पौनःपुन्येन निषेवणं तस्मात्तस्य दर्शनस्य दशुद्धिर्रजस्तमः
परिहाणात्सत्त्वैकतानता तया यो गुणपुरुषयोः प्रकर्षेण विवेकः पुरुषः शुद्धोऽनन्तस्तद्विपरीतास्तु गुणा इति तेनाप्यायिता बुद्धिर्यस्य योगिनः स तथोक्तः तदनेन यथा धर्ममेघाख्यः
समाधिरुक्तः स तथाभूतो योगी गुणेभ्यो व्यक्ताव्यक्तधर्मकेभ्यः सर्वथा विरक्तः सत्त्वपुरुषान्यताख्यातावपि गुणात्मिकायां यावद्विरक्त इति ततस्मो तद्द्वयं वैराग्यं तत्र त

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं दृष्टानुश्रविकविषयदोषदर्शी विरक्तः पुरुषदर्शनाभ्यासात्तच्छुद्धिप्रविवेका
प्यायितबुद्धिर्गुणेभ्यो व्यक्ताव्यक्तधर्मकेभ्यो विरक्त इति तद्द्वयं वैराग्यं तत्र यदुत्तरं तत् ज्ञानप्रसादमात्रं १६

सत्त्वसमुद्रेकविधूततमसि रजःकणकलङ्कसंपृक्ते चित्तसत्त्वे तत्तौष्टिकानामपि समानं तेहि तेनैव प्रकृतिलयाख्यभुवःपथोक्त वैराग्यात्प्रकृतिलय इति तत्र तत्सोद्वयोर्मध्य
दुत्तरं तत् ज्ञानप्रसादमात्रं मात्रग्रहणेन निर्विषयतांसूचयति तदेवाहिज्ञाहृत्यं चित्तसत्त्वं रजोलेशमलेनाप्य परामृष्टमस्याश्रयः अत एव ज्ञानप्रसाद इत्युच्यते चित्तस
त्त्वे हि प्रसादस्वभावमपि रजस्तमःसंपर्कीन्मलिनतामनुभवति वैराग्याभ्यासविमलवारिधाराधौतसमस्तरजस्तमोमलमतिप्रसन्नं ज्ञानप्रसादमात्रपरिशेषं भवति २५

पा०टी०
२३

तस्य गुणानुपादेयत्वाय दर्शयति यस्योदयेन निर्योगी प्रत्युदितख्यातिः ख्यातिः ख्यातिविशेषे सति वर्त्तमानख्यातिमानित्यर्थः प्राप्तं प्रापणीयं कैवल्यं प्राप्तं यथा वक्ष्यति जी
वन्नेव विद्वान्मुक्तो भवति संस्कारमात्रेण स्वच्छिन्नमूलस्य तिष्ठादितिभावः कुतः प्राप्तं यतः क्षीणाः क्षेतव्याः क्लेशाः अविद्यादयः सवासनाः नन्वस्ति धर्माः समूहो भवस्य ज
न्मरणप्रबंधस्य संक्रमः प्राणिनां तत्राकुतः कैवल्यमित्यत आह छिन्नरिति श्लिष्टानि निःसंधानि पर्वाणि यस्य सत्तथोक्तः धर्मो धर्म्मसमूहः स समूह हि नः पर्वाणि तानि छि

यस्योदये प्रत्युदितख्यातिरेवं मन्यते प्राप्तं प्रापणीयं क्षीणाः क्षेतव्याः क्लेशाः छिन्नः श्लिष्टपर्वा भवसंक्रमो यस्या
विच्छेदाज्जनित्वा म्रियते मृत्वा च जायत इति ज्ञानस्यैव परा काष्ठा वैराग्यं एतस्यैव हि नांतरीयकं कैवल्यमिति १६

ष्यति न हि जांतुजंतुर्मरणाजन्मप्रबंधेन मुच्यते सोयं भवसंक्रमः क्लेशक्षये विच्छिन्नः यथा च वक्ष्यति क्लेशमूलः कर्माशयः सति मूले तद्विपाक इति ननु प्रसंख्यानमेव परिपा
कं धर्ममेघं च निरोधं तत्र किं तदस्ति यज्ज्ञानप्रसादमात्रमित्यत आह ज्ञानस्यैवेति धर्ममेघभेदरागवपरं वैराग्यं नान्यत् यथा वक्ष्यति प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममे १३
घः समाधिस्तदा सर्वावरणमलापेतस्य ज्ञानस्यानंत्याज्ज्ञेयमल्पमिति च तस्मादेतस्य हि नांतरीयकमविनाभावि कैवल्यमिति १६

उपायमभिधाय सप्रकारोपेयकथनायच्छति। अथोपायद्वयेनेति वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः संप्रज्ञातपूर्वकत्वादसंप्रज्ञातस्य प्रथमं संप्रज्ञातोपवर्णनं सं-
प्रज्ञातं सामान्यं वितर्कविचारानंदास्मितानां रूपैः स्वरूपैरनुगमात्संप्रतिपत्तव्यं वितर्क्यं विवृतोऽस्ति चित्तस्य निजस्वरूपसाक्षात्कारवती प्रज्ञा आभोगः स च स्थूलविषयत्वात्स्थूलः
यथा हि प्राथमिको धानुष्कः स्थूलमेव लक्ष्यं विध्यत्यथ सूक्ष्ममेवं प्राथमिको योगी स्थूलमेव पाञ्चभौतिकं चतुर्भुजादिध्येयं साक्षात्करोत्यथ सूक्ष्ममिति एवं चित्तस्यालंब-
ने सूक्ष्म आभोगः स्थूलकारणभूतसूक्ष्मपंचतन्मात्रलिंगालिंगविषयो विचारः तदेव ग्राह्यविषयं दर्शयित्वा ग्रहणविषयं दर्शयति आनंद इंद्रिये स्थूल आलंबने चित्त-

अथोपायद्वयेन निरुद्धचित्तवृत्तेः कथमुच्यते संप्रज्ञातः समाधिरिति १५ वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः वितर्कः चित्तस्यालंबने
स्थूल आभोगः सूक्ष्मो विचारः आनंदो ह्लादः एकात्मिका संविदस्मिता तत्र प्रथमश्चतुष्टयानुगतः समाधिः सवितर्कः द्वितीयो वितर्कविकलः सवि-
चारः तृतीयो विचारविकलः सानंदः चतुर्थस्तद्विकलः अस्मितामात्र इति सर्व एते सालंबनाः समाधयः १७

स्याभोगो ह्लादोऽपरः आनंदः प्रकाशशीलतया खलु सत्त्वप्रधानादहंकारादिंद्रियाण्युत्पन्नानि सत्त्वं सुखमिति तान्यपि सुखानीति तस्मिन्नाभोगे ह्लाद इति। गृहीतृविषयं संप्र-
ज्ञातमाह एकात्मिका संविदिति अस्मिताप्रभवाणींद्रियाणि तेनैषामस्मिता सूक्ष्मं रूपं सा चात्मना गृहीत्रा सह बुद्धिरेकात्मिका संविदिति तस्यां च महत्तत्त्वमंतर्भावाद्भवति ग्र-
हीतृविषयः प्राज्ञान इति चतुर्णामप्यमुषामवांतरविशेषमाह तत्र प्रथम इति कार्यकारणानुप्रविष्टं कारणांशं येन तदेवं स्थूल आभोगः स्थूलसूक्ष्मेंद्रियास्मिताकारणाच-
तुष्टयानुगतो भवति उत्तरे तु त्रिद्व्येककारणाक्लिष्टरूपा भवंति असंप्रज्ञाताद्भिन्न इति सर्व एत इति १७

क्रमप्राप्तमसंप्रज्ञातमवतारयितुं पृच्छति । अथेति विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः पूर्वपदेनोपायकथनमुत्तराभ्यां च स्वरूपकथनमन्यपदं विवृणोति सर्ववृत्तीति अथ प्रसंख्या
वधे तस्य परमिति विरामो वृत्तीनामभावस्तस्य प्रत्ययः कारणं तस्याभ्यासस्तदनुष्ठानं पौनःपुन्यं तदेव पूर्वं यस्य स तथा अपरं वैराग्यं निरोधकारणं कस्मान्न भवतीत्यत आह सालंब
नो हीति कार्यसरूपं कारणं युज्यते न विरूपं विरूपं चापरं वैराग्यं सालंबनं निरालंबनेन समाधिना कार्येण तस्मान्निरालंबनादेव ज्ञानप्रसादमात्रात्तस्योत्पत्तिर्युक्ता धर्ममेघसमाधिरेव हि
नितांतविगलितरजस्तमोमलस्य बुद्धिसत्त्वादुपजातस्तद्विषयातिक्रमेण प्रवर्द्धमानोऽनंतो विवेकावधेदर्शी समस्तविषयपरित्यागात्स्वरूपप्रतिष्ठः सन्निरालंबनः संस्कारमात्रशे

अथासंप्रज्ञातः समाधिः किमुपायः किंस्वभावो वेति १८ विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधश्चित्तस्य समा
धिरसंप्रज्ञातः तस्य परं वैराग्यमुपायः सालंबनो ह्यभ्यासस्तत्साधनाय न कल्पत इति विरामप्रत्ययो निर्वस्तुक आलंबनी क्रियते स चार्थशून्यः तदभ्यास
पूर्वकं चित्तं निरालंबनमभावप्राप्तमिव भवतीत्येष निर्बीजः समाधिरसंप्रज्ञातः स खल्वयं द्विविध उपायप्रत्ययो भवप्रत्ययश्च तत्रोपायप्रत्ययो योगिनां भवति १८

षस्य निरालंबनस्य समाधेः कारणमुपपद्यते सारूप्यादिति आलंबनीकरणमाश्रयणमभावप्राप्तमिव भवतिरूपं कार्याकरणात् निर्बीजो निरालंबनः अथवा बीजं क्लेशकर्माशया
स्तेभ्यः निःक्रांता यस्मात्स तथा निरोधसमाधेरवांतरभेदं हानांगमादर्शयति स खल्वयं निरोधसमाधिर्द्विविधः उपायप्रत्ययो भवप्रत्ययश्च यो येव वक्ष्यमाणः श्रद्धादिः प्रत्ययः कारणं य
स्य निरोधसमाधेः स तथोक्तः भवंति जायंतेऽस्यां जंतव इति भवोऽविद्या भूतेंद्रियेषु वा विकारेषु प्रकृतिषु वा अव्यक्तमहदहंकारपंचतन्मात्रेषु चानात्मस्वात्मख्यातिस्तौष्टिकानां वैराग्यसंपन्ना २५
नां स खल्वयं भवः प्रत्ययः कारणं यस्य निरोधसमाधेः स भवप्रत्ययः तत्र तयोर्मध्ये उपायप्रत्ययो योगिनां मोक्षमाणानां भवति । विशेषविधानेन शेषस्य मुमुक्षुसंबंधं निषेधति १८

कथं तर्हि भवप्रत्यय इत्यत्र सूत्रेणोत्तरमाह भवप्रत्ययो विदेहप्रकृतिलयानां विदेहाश्च प्रकृतिलयाश्च तेषामित्यर्थः तद्व्याचष्टे विदेहानां देवानां भवप्रत्ययो भूतेंद्रियाणामन्यतमदा
त्मत्वेन प्रतिपन्नास्तदुपासनवासनया वासनावासिताः ततः कृतरागाः पिंडपातानंतरमिंद्रियेषु भूतेषु वा लीनाः संस्कारमात्रावशेषाश्च ततः षाट्कौशिकशरीररहिता विदेहास्ते स्वसंस्कार
मात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवंतः प्राप्नुवंतः विदेहा अवृत्तिकत्वं कैवल्येन सारूप्यं साधिकारसंस्कारशेषतया च वैरूप्यं संस्कारमात्रोपभोगेनेति क्वचित्पाठः तस्यार्थः संस्कारमा
त्रमेवोपभोगो यस्य न तु वृत्तिरित्यर्थः प्राप्तावधयः संस्कारविपाकं तथाजातीयकमतिवाहयंत्यतिक्रामंति पुनरपि संसारे विशंतीति तथा च वायुप्रोक्तं दश मन्वंतराणीह तिष्ठं
ती इंद्रियचिंतकाः भौतिकाश्च शतं पूर्णमिति तथा प्रकृतिलयाश्चाव्यक्तमहदहंकारतन्मात्रेष्वन्यतमदात्मत्वेन प्रतिपन्नास्तदुपासनया तद्वासनावासिताः ततः कृतरागाः पिंडपातानंतरम

भवप्रत्ययो विदेहप्रकृतिलयानां विदेहानां देवानां भवप्रत्ययः ते हि स्वसंस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवंतः स्वसंस्कार
विपाकं तथाजातियकमति तथा प्रकृतिलयाः साधिकारे चेतसि प्रकृतिलीने कैवल्यपदमिवानुभवंति याचन्न पुनरावर्तते अधिकारवशा
॥ च्चित्तमिति १९ २९

व्यक्तादीनामन्यतमस्मिन्नलीनाः साधिकारे चरितार्थ एवं हि चरितार्थं चेतः स्याद्यदि विवेकख्यातिमपि जनयेद जनितत्तत्वपुरुषान्यता
ख्यातेस्तु चेतसो चरितार्थस्यास्ति साधिकारतेति साधिकारे चेतसि प्रकृतिलाने कैवल्यपदमिवानुभवंति यावन्न पुनरावर्ततेऽधिकारवशाच्चित्तमिति प्रकृतिसाम्यमुपग
तमप्यवधिं प्राप्य पुनरपि प्रादुर्भवति ततो विविच्यते यथा वर्षातिपाते मृद्भावमुपगतो मंडूकदेहः पुनरंभोदवारिधारावसेकान्मंडूकदेहमनुभवतीति तथा
च वायुप्रोक्तं सहस्रं त्वाभिमानिकानिकाः बौद्धा दश सहस्राणि तिष्ठंति विगतज्वराः पूर्णं शतसहस्रं तु तिष्ठंत्यव्यक्तचिंतकाः पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यत इति १९

पा॰टी॰ तदस्यामुनर्जीवमाप्तिहेतुत्वपाहेयत्वंसिद्धं योगिनां तु समाधेरुपायक्रममाह श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां न सिद्धिपादिचिंतकानामपि श्रद्धावतस्तदेतत् आह
१५ श्रद्धा चेतसः संप्रसादः स चागमानुमानाचार्योपदेशसमधिगततत्त्वविषयो भवति हि चेतसः संप्रसादो ऽभिरुचिरतीच्छा श्रद्धा नेंद्रियादिषाता मिभा निना मानिरुचि
रसंप्रसादो हि सः व्यामोहमलात्यादित्यर्थः कुतो स्यावेव श्रद्धेत्यत आह सा हि जननीव कल्याणी योगिनं पाति विमार्गपातजन्मनो नर्थात् उपनिष्ठाचिरेणा उपमा
नाविषपेप्रयत्नं प्रस्तरस्माहेतस्या हि श्रद्दधानस्येत्यस्य विवरणं विवेकार्थिनो वीर्यमुपजायते स्मृतिर्ध्यानं मनाकुलमविक्षिप्तं समाधीयते योगांगसमाधियुक्तं भवति यम

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां उपायप्रत्ययो योगिनां भवति श्रद्धा चेतसः संप्रसादः सा हि जननीव कल्याणी योगिनं पाति तस्य हि श्रद्दधानस्य विवेकार्थिनो वीर्यमुपजायते समुपजातवीर्यस्य स्मृतिरुपतिष्ठते स्मृत्युपस्थाने च चित्तमनाकुलं समाधीयते समाहितचित्तस्य प्रज्ञाविवेक उपावर्तते येन यथार्थं वस्तु जानाति तदभ्यासात्तद्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवति २०

नियमादिनां तरापक्षसमुच्चयम्यासेन च यम नियम नियमाद्यो पि संचिताः तदेवमखिलयोगांगासंपन्नस्य संप्रज्ञातो जायत इत्याह समाहितचित्तस्येति प्रज्ञाया विवेकः २०
प्रकर्ष उपजायते संप्रज्ञातो स्याद्भ्याहतदभ्यासात् तत्रैवतत्तद्भिप्रायो तत्र द्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवति स हि कैवल्यहेतुः सत्त्वपुरुषान्यताख्यातिरपि हि नि
रोधस्त्रिन समखिलकार्यकरणेनव चितार्थमधिकारादवसादयति २०

नेनुग्रहादयमस्य योगोपायास्तर्हि सर्वेषामविशेषेण समाधिलाभः स्फलं स्यातां दृश्यते तु कस्यचित्सिद्धिः कस्यचिदसिद्धिः कस्यचिद्विलम्बेन सिद्धिः कस्यचिच्चिरतरेण कस्यचित्क्षिप्रमित्यत आह
ते खलु नवयोगिनः इति उपायाः श्रद्धादयो मृदुमध्याधिमात्राः प्राग्भावीयसंस्कारादृष्टवशाद्येषां ते तथोक्ताः संवेगो वैराग्यं तत्रापि मृदुमध्यतीव्रता प्राग्भवीयवासनादृष्टवशादेवेति ते
षु यादृशाद्दक्षेपीयसी सिद्धिस्तान्दर्शयति सूत्रेण तीव्रसंवेगानामासन्न इति सूत्रं शेषं भाष्यं समाधेः संप्रज्ञातस्य फलं च असंप्रज्ञातस्तस्यापि कैवल्यं मृदुमध्याधिमात्रत्वात्ततोपि विशे

ते खलु नवयोगिनो मृदुमध्याधिमात्रोपाया भवंति तद्यथा मृदूपायो मध्योपायोधिमात्रोपाय इति तत्र मृदूपायस्त्रिविधः मृदुसंवेगः मध्यसंवेगः तीव्रसंवेग
इति तथा मध्योपायः तथाधिमात्रोपाय इति १९ तत्राधिमात्रोपायानां तीव्रसंवेगानामासन्नः समाधिलाभः समाधिफलं च भवतीति २० मृदुमध्याधिमात्र
त्वात्ततोपि विशेषः मृदुतीव्रो मध्यतीव्रो अधिमात्रतीव्र इति ततोपि विशेषः तद्विशेषादप्यासन्नतरः मोधिमात्रतीव्रसंवेगस्याधिमात्रोपायस्य समाधिलाभः
समाधिफलं चेति मृदुतीव्रसंवेगस्यासन्नस्ततोपि मध्यतीव्रसंवेगस्यासन्नतरस्ततोधिमात्रके किंचिदुपायो न वेति २१ ईश्वरप्रणिधानाद्वा ईश्वरप्रणिधाना
द्भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णात्यभिध्यानेन तानां तीव्रसंवेगस्यासन्नतमः किमेतस्मादेवासन्नतरः समाधिर्भवति अथास्य लाभे भवति अन्योपि तदभिध्या
नादपि योगिन आसन्नतरः समाधिलाभः समाधिलाभः समाधिफलं च भवतीति ३१

षः निगदव्याख्यातेन भाष्येण व्याख्यानमिति सूत्रान्तरं पातयितुं विमृशति किमस्मादेवेति नवाशब्दः संशयनिवर्तकः ईश्वरप्रणिधानाद्वा व्याचष्टे प्रणिधानाद्भक्तिविशेषान्मानसा
द्वाचिकात्कायिकाद्वा आवर्जितोभिमुखीकृतस्तमनुगृह्णाति अभिध्यानमात्रेण नैयेरिच्छा इदमस्याभिमतमस्त्विति तन्मात्रेण न व्यापारान्तरेण शेषं सुगमं ३१

पा॰टी॰ ननु चेतनाचेतनाभ्यामेव सृष्टं नान्येन द्विष्टं ईश्वरश्चेद् चेतनस्तर्हि प्रधानविकाराणामपि प्रधानमध्यपातात् तत्परिवर्जनमचेतनत्वात् अथ चेतनस्तथापि चितिशक्तेरौदासीन्यात् संसा
१९ रितया क्लिष्टादिविरहात् कुतस्त्यावर्जनं कुतश्चाभिध्यानमित्याशयवानाह अथ प्रधानेति अत्र सूत्रेण रमाह क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः अविद्याद
यः क्लेशाः क्लिश्यन्ति खल्वमी पुरुषं सांसारिकं विविधदुःखप्रहारेणेति कुशलाकुशलानीति धर्माधर्मौ तेषां च कर्मजत्वात् उपचारात् कर्मत्वं विपाको जात्यायुर्भोगाः विपाका
नुगुणा वासना आफलविपाकाच्चित्तभूमौ आशेरत इत्याशयाः न हि करभजातिनिर्वर्तकं कर्म प्राग्भवीयकरभभोगभावितां भावनामनपेक्ष्य तदभिव्यक्तिं तावत् करभोचितायभोगाय
कल्पते तस्मादूर्ध्वेति करभजात्यनुभवजन्मा भावनाकरभविपाकानुगुणेति तन्त्रमात् क्लेशादयो बुद्धिधर्मा न कथंचिदपि पुरुषं परामृशन्ति तस्मात्पुरुषग्रहणादेव तदपरा

अथ प्रधानपुरुषव्यतिरिक्तः कोऽयमीश्वरो नामेति क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः अविद्यादयः क्लेशाः कुशलाकुशलानि कर्माणि तत्फलं विपाकः त
दनुगुणा वासना आशयास्ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते स हि तत्फलस्य भोक्तेति यथा जयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते योह्य
नेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः ते हि त्रीणि बन्धनानि छित्त्वा कैवल्यं प्राप्ताः ईश्वरस्य च तत्सम्बन्धो न भूतो न भा
वी यथा मुक्तस्य पूर्वा बन्धकोटिः प्रज्ञायते नैवमीश्वरस्य यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटिः संभाव्यते नैवमीश्वरस्य स तु सदैव मुक्तः सदैवेश्वर इति २४

मर्शसिद्धेः क्लेशकर्मादिनेत्यत आह ते च मनसि वर्तमानाः सांसारिके पुरुषे व्यपदिश्यन्ते कस्मात् स हि तत्फलभोक्ता चेतयितेति तस्मात्पुरुषत्वादीश्वरस्यापि तत्सम्बन्धः
प्राप्त इति तत्प्रतिषेधमुपपादयति तस्याह योह्यनेनेति बुद्धिस्थेनापि पुरुषमात्रसाधारणेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः विशिष्यत इति विशेषः पुरुषान्तरादवच्छिद्यते विशेषमप
द्यावस्थ दर्शयितुकामः परिचोदयति कैवल्यं प्राप्तास्तर्हीति प्रकृतिलयानां प्रकृतो बन्धः वैकारिको बन्धो विदेहानां दक्षिणाबन्धो दिव्यादिव्यविषयभोगभाजां ता १९
न्यमभित्त्रीणि बन्धनानि प्रकृतिभावनासंस्कृतमनसो हि देहपातानन्तरमेव प्रकृतिलयतामापन्ना इति न तेषां पूर्वा बन्धकोटिः प्रज्ञायते तेनोत्तरकोटिविधानमात्रमिहातुपूर्वापरको
टिनिषेध इति संक्षिप्य पविषयदर्शयति स तु सदैव मुक्तः सदैवेश्वर इति ज्ञानक्रियाशक्तिसम्पदैश्वर्यं २४

गेऽथ तत्पृच्छति योसाविति ज्ञानक्रिये हि न चिच्छक्तेरपरिणामिन्यासंभवत इति रजस्तमोरहितविशुद्धचित्तसत्वाश्रयेव कथ्येन चेश्वरस्य सदामुक्तस्याविषयप्रभवतश्चि
त सविसमुत्कर्षेण महत्त्वस्वामिभावश्च संबंधः सं तत्वतीयत उक्तं प्रकृष्टसत्वोपादानादिति नेश्वरस्याप्यभ्यजनस्येवाविद्यानिबंधनश्चित्तसत्वेन स्वस्वामिभावः किंतु नापन्नपपरितान्त्रे
स भावमहार्णवान्तर्गतं जन्तुमुद्दिधीर्षया ज्ञानधर्मोपदेशेन न च ज्ञानक्रियासामर्थ्यातिशयसंपत्तिमंतरेण तदुपदेशो न चेपम१हतरजस्तमोमलविशुद्धसत्वोपादानं विनेत्या
नोऽयं सत्वप्रकर्षमुपादत्ते भगवान् परमकारुणिकः अविद्याऽविद्याभिमानीव विद्यायास्तु प्रविद्वान् भवति न पुनरविद्याय विद्या चेन्न सो वमानः नटवत्तु शैलूषो रामत्वमारोप्य
तात्ताच्छेष्टादर्शयन् रामो भवतीति तदिदमाहार्यं मस्य रूपेन तात्विकमिति स्यादेतत् उत्कृष्टधीर्यया भगवता सत्वमुपादेयं तदुपादानेन च तदुत्कृष्टधीः अस्याश्रविप्राकृतता

योसौ प्रकृष्टसत्वोपादानादीश्वरस्य शाश्वतिक उत्कर्षः स किं सनिमित्त आहोस्वित् निर्निमित्त इति २३

तत्र यथाऽस्योत्कर्षः ... उक्तः शाश्वतिक इति मवेदेतद् देतदेवं यदीदं प्रथमतः सर्गस्य भवेत् अनादौ तु सर्गसंहारप्रबंधे सर्गान्तरीयं समुत्पन्नं संजिहीर्षोर्विधिसमये प्रणीमया
सत्वप्रकर्ष उपादेय इति प्रणिधानं कृत्वा भगवान् जहात् संजहार तद्वाचेश्वरसत्वं प्रणिधानवासितं प्रधानसाम्यमुपगतमपि प्रति सर्गं महाप्रलयावधिप्रणिधानवासनावशात्तथैवेश्वर
चित्ते सत्वभावेन परिणमते यथा चैत्रः प्रातरेवोत्थातव्यमपेति प्रणिधाय सुप्तः प्रातरेवोत्तिष्ठति प्रणिधानसंस्कारात् तस्मादनादिरीश्वरप्रणिधानसत्वोपादानयोः शाश्वति
कत्वेन तादात्म्योऽस्याश्रयः न चेश्वरस्य चित्तसत्वं महाप्रलयेऽपि न प्रकृतिसाम्यमुपैतीति वाच्यं यस्य हि न कदाचिदपि प्रधानसाम्यं तत्प्राधानिकं नापि विनिशान्तिरसतादित्सर्थ ३३
तिरमणिकमापद्येत तच्चानुक्तं प्रकृतिपुरुषव्यतिरेकेणार्थान्तराभावात् सोऽयमीदृशः ईश्वरस्य शाश्वतिक उत्कर्षः स किं सनिमित्तः सप्रमाणकः आहोस्विन्निर्निमित्तो निः

पा.टी. उत्तरं तस्य शास्त्रं निमित्तं श्रुतिस्मृतीतिहासपुराणानि शास्त्रं चोदयन्ति शास्त्रं पुनः किं निमित्तं प्रत्यक्षानुमानपूर्वं हि शास्त्रं न चेश्वरस्य सत्त्वप्रकर्षे कस्यचित्प्रत्यक्षमनुमा
१८ नं वास्ति। न चेश्वरप्रत्यक्षमेवं शास्त्रमिति युक्तं कल्पयित्वापि हि पं तू पादानैश्वर्यप्रकाशनायेति भावः परिहरति प्रकृष्टसत्त्वनिमित्तं अयमभिसंधिः मंत्रायुर्वेदेषु तावदीश्व
रप्रणीतेषु प्रवृत्तिसामर्थ्यादर्थाव्यभिचारविनिश्चयात्प्रामाण्यं सिद्धं न चैषधिभेदानां तत्तत्संयोगविशेषाणां चतन्नद्दूरणीया योद्धारेण सहस्रेणापि पुरुषायुषैर्लौकिकप्र
माणव्यवहारिणा शक्तः कर्तुमन्वयव्यतिरेकौ न चागमादन्वयव्यतिरेकैताभ्यां चागमस्तत्र संतानेनयोरनादित्वादिति प्रामाण्यादपि तु युक्तं महाप्रलयेन तत्संतानयोर्विच्छेदात्

तस्य शास्त्रं निमित्तं शास्त्रं पुनः किं निमित्तं प्रकृष्टसत्त्वनिमित्तं २४

न च तद्भावे प्रमाणाभावः अभिन्नं प्रधानविकारो जगदिति हि प्रतिपादयिष्यते सदृशपरिणामस्य विसदृशपरिणामता इष्टा यथा क्षारेक्षुरसादेर्दधिगुडादि १८
रूपं विसदृशपरिणामस्तावदृष्टः न हि प्रधानेनापि महदहंकारादिरूपविसदृशपरिणामेन सत्ताभाव्यं कदाचित्सदृशपरिणामेनापि सदृशपरिणामस्तस्य साम्यावस्था
सत्त्वमहाप्रलयः तस्मान्मंत्रायुर्वेदप्रणयनात्तावद्भगवतो विनिर्गलितरजस्तमोमलावरणात पापरितः प्रद्योतमानं बुद्धिसत्त्वमास्थेयं तथा चाभ्युदयनिःश्रेयसोपदेशपरोप
वेदिनास्तीश्वरप्रणीतस्तत्र बुद्धिसत्त्वप्रकर्षोऽदेवमवितुमर्हति न च सत्त्वोत्कर्षे रजस्तमःप्रभवौ विभ्रमविप्रलंभौ संभवतः तत्सिद्धं प्रकृष्टसत्त्वनिमित्तं शास्त्रमिति २४

स्यादेतत् प्रकर्षकार्ययोः प्रकर्षबोधकशास्त्रेश्वरवदनुमानं भवेत्त्वागम इत्यत आह एतयोरिति न कार्यत्वेन बोधयति अपित्वनादिवाच्यवाचकभावसंबंधेन बोधयतीत्यर्थः
ईश्वरस्य हि बुद्धिसत्त्वप्रकर्षे विहिते शास्त्रमपि तद्वाचकत्वेन तत्र वर्तते इत्युपसंहरति तस्मादीश्वरबुद्धिसत्त्वप्रकर्षवाचकात् शास्त्रादेतद्भवति ज्ञायते विषये रागाद्विषयविरोगलक्षणात्
सदैवेश्वरः सदैव मुक्त इति तदेवं पुरुषांतराद्व्यावर्त्येश्वरांतरादपि व्यवच्छिनत्ति तच्च तस्येति अतिशयविनिर्मुक्तिमाह न तावदिति कुतः यदेवेति कस्मात्तस्य वातिशयविनिर्मुक्तं तदै

एतयोः शास्त्रोत्कर्षयोरीश्वरसत्त्वे वर्त्तमानयोरनादिः संबंधः एतस्मादेतद्भवति सदैवेश्वरः सदैव मुक्त इति तच्च तस्यैश्वर्यं साम्यातिशयाभ्यां निशयविनिर्मु
क्तं न तावदैश्वर्यांतरेण तदतिशय्यते यदेवातिशयि स्यात्तदेव तत्स्यात् तस्माद्यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वर इति न च तत्समानमैश्वर्यमस्ति कस्मा
त् द्वयोस्तुल्ययोरेकस्मिन् युगपत्कामितेऽर्थे नवमिदमस्तु पुराणमस्त्विति एकस्य सिद्धावितरस्य प्राकाम्यविघातादूनत्वं प्रसक्तं द्वयोश्च तुल्ययोर्युगपत्का
मितार्थप्राप्तिर्नास्ति अर्थस्य विरुद्धत्वात् तस्माद्यस्य साम्यातिशयविनिर्मुक्तमैश्वर्यं स ईश्वरः स च पुरुषविशेष इति ३५

श्वर्यमित्यत आह तस्माद्यत्रेति अतिशयनिष्ठामप्राप्तानामौपचारिकमैश्वर्यमित्यर्थः साम्यविनिर्मुक्तिमाह न च तत्समानमिति प्राकाम्यमविहतेच्छता तद्विघातादूनत्वं अन्
न्यत्वे वा द्वयोरपि प्राकाम्यविघातः कार्यानुत्पत्तेरुत्पत्तौ वा विरुद्धधर्मसमालिंगितमेकदा कार्यमुपलभ्येतेत्याशयवानाह द्वयोश्चेति अविरुद्धाभिप्रायत्वे वा प्रत्येकमीश्वरत्वे कतम
स्यैकैकेनैवेनानामाः कृतत्वात् संभूयकारित्वे वानेकस्मिन्नीश्वरः परिषद्वत् नियेश्वरानायोगिनां च पर्यायायोगात् कल्पनागौरवप्रसंगाद्वेति द्रष्टव्यं तस्मात्स एवमवदत ३५

पा॰टी॰ १९ णवमस्य क्रियाज्ञानशक्त्योः शास्त्रं प्रमाणमभिधाय ज्ञानशक्तावनुमानं प्रमाणयति किंचेति तत्र निरतिशयं सर्वज्ञबीजं व्याचष्टे यदिदमिति बुद्धिसत्त्वावकृततमोपगमतारतम्येन
यदिदमतीतानागतप्रत्युत्पन्नानां प्रत्येकं च समुच्चयेन च वर्तमानानामतीन्द्रियाणां ग्रहणं तस्य विशेषणमल्पं बह्विति सर्वज्ञबीजं कारणं कस्मिंश्चित् किंचिद्देवातीतादिग्रहा
ति कस्मिंश्चिद्बहु कस्मिंश्चिद्बहुतरं कस्मिंश्चिद्बहुतममिति निम्नात्वापेक्षया पहरणस्याल्पत्वं बहुत्वं बहुतत्वं एतद्विवर्धमानं यत्र निःक्रान्तमतिप्राप्तं स सर्वज्ञ इति तदनेन प्रमेयमात्रं कथितं अ
थ प्रमाणयति अस्ति काष्ठाप्राप्तिः सर्वज्ञबीजस्येति साध्यनिर्देशः निरतिशयत्वं काष्ठा यतः परमतिशयवत्ता नास्तीति तेन नावधिमात्रेण सिद्धसाधनं सातिशयत्वादिति हेतुप

किंच २५ तत्र निरतिशयं सर्वज्ञबीजं यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसमुच्चयातीन्द्रियग्रह
णमल्पं बह्विति सर्वज्ञबीजमेतद्धि वर्धमानं यत्र निरतिशयं स सर्वज्ञः अस्ति काष्ठाप्राप्तिः सर्वज्ञबीजस्य
सातिशयत्वात् परिमाणवदिति यत्र काष्ठाप्राप्तिर्ज्ञानस्य स सर्वज्ञः स च पुरुषविशेष इति २५

दस्य सातिशयत्वं तत्सर्वं निरतिशयं यथा कुवलयामलकबिल्वेषु सातिशयं परिमाणं आत्मनि निरतिशयमिति व्याप्तिं दर्शयति परिमाणवत् न च गरिमादिभिर्गुणैर्व्यभिचार इत्याह सांप्रतं १९
न खल्ववयवगरिमाणिशयगरिमावयविनः किं त्वा परमाणुभ्यः आगमात्स्य विप्रोपावन्तः केचन तेषां सर्वेषां प्रत्येकं वर्तिनो गरिमाणः समाहृत्य गरिम वर्धमानानामभिमानः ज्ञानं तु न तथा विज्ञे
यमप्येतदस्त्येकद्विबहुविषयमतत्पाउक्तं सातिशयमिति न व्यभिचारः उपसंहरति यत्र काष्ठेति २५

ननु संति बहवस्तीर्थकरा बुद्धार्हत्कपिलादिप्रभृतयस्तत्र कस्मादेव सर्वज्ञो न सर्वे यस्मादनुमानादित्यत आह सामान्येति कुतस्तर्हि तद्विशेषप्रतिपत्तिरित्यत आह तस्येति बुद्धादि
प्रणीत आगमाभासो न त्वागमः सर्वप्रमाणबाधितक्षणिकत्वनैरात्म्यादिमार्गोपदेशकत्वेन विप्रलंभकत्वादिति भावः तेनेतिहासपुराणलक्षणादागमत आगच्छंति बुद्धिमारोढुं
हंतित्यस्मादभ्युदयनिःश्रेयसोपाया इत्यागमः तस्मात्तत्संज्ञाविशेषप्रतिपत्तिः संज्ञाविशेष्यः शिवेश्वरादिः भक्त्यादिषु प्रसिद्धः आदिपदेन षडंगतादृशाव्ययपते संगृहीते यथो

सामान्यमात्रोपसंहारे कृतोपक्षयमनुमानं न विशेषप्रतिपत्तौ समर्थमिति त
स्य संज्ञादिविशेषप्रतिपत्तिरागमतः पर्यन्वेष्या ३७

क्तं वायुपुराणे सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिः अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्य तथा ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्ष
मा धृतिः सृष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च अव्ययानि दशैतानि नित्यं तिष्ठंति शंकरे इति ३७

पा॰टी॰ ९८

स्यादेतन्निमित्तमस्य भगवतो वैराग्य ।ऐश्वर्यसंपन्नस्य स्वार्थेनतस्मात् संभवात् कारुणिकस्य चास्तु रेवं कृतानजननसर्जनपरस्य दुःखबहुलजीवलोकजननानुपपत्तेरप्रयोजनस्य च प्रेक्षा
वतः प्रवृत्त्यनुपपत्तेः । किमाशङ्क्याह । तेनो ।पि न जगत्सृष्टेस्तत आह तस्यात्मानुग्रहाभावेऽपीति भूतानां प्राणिनामनुग्रहः प्रयोजनं शब्दाद्युपभोगविवेकख्यातिरूपकार्यकरणात् कि
लचरितार्थं चित्तं निवर्त्तेत ततः पुरुषः केवली भवति अत्र तत्प्रयोजनाय कारुणिको विवेकख्यात्युपायं कथयति तेनाचरितार्थत्वाच्चित्तस्य जंतुनीश्वरः पुण्यापुण्यापि सहायः सुखदुः
खभावपन्नापि ना कारुणिकः विवेकख्यात्युपायकथनाभूतानुभूतानुग्रहाद्वारमाह ज्ञानधर्मोपदेशेनेति ज्ञानं च धर्मश्च ज्ञानधर्मौ तयोरुपदेशेन ज्ञातधर्मसमुद्भवात् ज्ञेयविवेकख्या
तिपरिपाकात् कल्पप्रलये ब्रह्मणो दिनावसाने पत्र सत्यलोकवर्ज्जं जगदस्तमेति महाप्रलये तु सत्यलोकस्य ब्रह्मणोऽपि निधने संसारिणः पुरुषानुद्धरिष्यामीति वक्ष्यमाणपुर

तस्यात्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनं ज्ञानधर्मोपदेशेन कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति तथा चोक्तं आदिवि
द्वान्निर्माणचित्तमधिष्ठाय कारुण्याद्भगवान् परमर्षिरासुरये जिज्ञासमानाय तंत्रं प्रोवाचेति २८

षाउद्धतामवंती स्वर्थाएतद्धकरुणाप्रयुक्तस्य ज्ञानधर्मोपदेशनं कापि ज्ञानामपि सिद्धमित्याह तथा चोक्तं पंचशिखाचार्येण आदिविद्वान्कपिल इति आदिविद्वानिति पंचशिखा
खाचार्यवचनं आदिमुक्तस्येश्वराना दिमुक्तविषयं न त्वनादिमुक्तपरमगुरुविषयं आदिमुक्तेषु कदाचिन्मुक्तेषु विद्वत्सु कपिलोऽस्माकमादिविद्वान्मुक्तः स एव गुरुरिति ९८
कपिलस्यापि जायमानस्य महेश्वरानुग्रहादेव ज्ञानप्राप्तिः श्रूयत इति कपिलो नाम विष्णोरवतारविशेषः प्रसिद्धः स्वयंभूर्हिरण्यगर्भस्तस्यापि सांख्ययोगप्राप्तिर्वेदे श्रूयते इ
ति स एवेश्वर आदिविद्वान् कपिलो विष्णुर्न स्वयंभूरिति भावः स्वायंभुवानां तीश्वर इति भावः २८

संप्रति भगवतो ब्रह्मादिभ्यो विशेषमाह स एष इति प्रातनिकाम् एष इति सूत्रं पूर्वेषामपि गुरुः कालेनानवच्छेदात् व्याचष्टे पूर्वे हीति कालस्तु शतवर्षादिः अवच्छेदार्थेन अवच्छे-
देन प्रयोजनेन नोपावर्त्तनेन वर्त्तते प्रकर्षस्य गतिः प्राप्तिः प्रत्येतव्य आगमात् तदनेन प्रबंधेन भगवानीश्वरो दर्शितः संप्रति तत्प्रणिधानं दर्शयितुं तस्य वाचकमाह तस्य
वाचकः प्रणवः व्याचष्टे वाच्य इति तत्र परेषां मते विमर्शद्वारेणोपन्यस्यति किमस्येति वाचकत्वं प्रतिपादकत्वमित्यर्थः परे हि पश्यंति यदि स्वाभाविकः शब्दार्थयोः संबंधः सं-
केतेनास्माच्छब्दादयमर्थः प्रत्येतव्य इत्येवमात्मकेनाभिव्यज्यते ततो यत्र नास्ति संबंधस्तत्र संकेतशतेनापि न व्यज्यते । नहि प्रदीपघटयोः संबंधो यत्र नास्ति तत्र प्रदीपसहस्रे-

स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् पूर्वे हि गुरवः कालेनावच्छिद्यंते यत्रावच्छेदार्थेन कालो नोपावर्त्तते स एष पूर्वेषामपि गुरुः यथा-
स्य सर्गस्यादौ प्रकर्षगत्या सिद्धस्तथातिक्रांतसर्गादिष्वपि प्रत्येतव्यः २६ तस्य वाचकः प्रणवः वाच्य ईश्वरः प्रणवस्य किमस्य संकेतकृतं वाच्यवा-
चकत्वं अथ प्रदीपप्रकाशवदवस्थितमिति स्थितोस्य वाच्यस्य वाचकेन सह संबंधः संकेतस्तु ईश्वरस्य स्थितमेवार्थमभिनयति यथावस्थितः
पितापुत्रयोः संबंधः संकेतेनावद्योत्यते अयमस्य पिता अयमस्य पुत्र इति २७

णापि शक्यो व्युत्पादयितुं संकेतस्तु करभशब्दो वारणो वारणप्रतिपादको दृष्टः ततः संकेतकृतमेव वाचकत्वमिति विमृश्य स्वाभिमतमवधारयति स्थितोस्येति अयमभिप्रा-
यः सर्वे एव शब्दाः सर्वाकारार्थाभिधानसमर्था इति स्थित एवैषां सर्वाकारैरर्थैः स्वाभाविकः संबंधः ईश्वरसंकेतस्तु प्रकाशकश्च नियामकश्च तस्य ईश्वरसंकेतकृतश्चास्य वाचका-
पन्नांशविभागः तदिदमाह संकेतस्त्वीश्वरस्येति निदर्शनमाह यथेति ३९

पा.टी.
२० ननु शब्दस्य प्राधानिकस्य महाप्रलयसमये प्रधानभावमुपगतस्य शक्तिरपि प्रलीना ततो महदादिक्रमेणोत्पन्नस्य वाचकस्यैव माहेश्वरेण संकेतेनेन शब्दस्य वाचकशक्तिरभिव्य
ज्यितुं विनष्टशक्तित्वादित्यत आह सर्गान्तरेष्वपीति यद्यपि महाप्रलये शक्त्या प्रधानभावमुपगतः शब्दस्तथापि पुनराविर्भवंस्तच्छक्तियुक्त एवाविर्भवतीति वधीतिपातसमधिगतमस्म

सर्गान्तरेष्वपि वाच्यवाचकशक्त्यपेक्षस्तथैव संकेतः क्रियते संप्रतिप
त्तिनित्यतया नित्यः शब्दार्थसंबंध इत्यागमिनः प्रतिजानते विज्ञात
वाच्यवाचकत्वस्य योगिनः २६

पानसमधिगतमस्मद्बुद्धिर्वा द्विजो मेघविस्फूर्जवारिधारासारावसेकात् तेन पूर्वसंबंधसंकेतः क्रियते भगवता इति तस्मात्संप्रतिपत्तेः सदृशव्यवहारपरंपरायाः नित्य २०
तयानित्यः शब्दार्थयोः संबंधो न कूटस्थनित्य इत्यागमिकाः प्रतिजानते ननु पुनरागमनिरपेक्षाः सर्गान्तरेष्वपि तादृश एव संकेत इति प्रतिपन्ना इति भावः

वाचकमाख्याय प्रणिधानमाह तज्जपस्तदर्थभावनं व्याचष्टे प्रणवस्येति भावनं पुनः पुनश्चेतसि निवेशनं ततः किं सिध्यतीत्यत आह प्रणवमिति एकस्मिन् भगवति आरमति चित्तं। अत्रैव वैयासिकीं गाथामुदाहरति तथा चेति ततः ईश्वरः समाधितत्फललाभेन तमनुगृह्णाति । किं चापरस्मात् ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च प्रतीपं विपरीतमञ्चति विजानातीति प्रत्यक् स चासौ चेतनश्चेति प्रत्यक्चेतनोऽविद्यावान् पुरुषः तदनेनेश्वरात् शाश्वतिकसत्त्वोत्कर्षसंपन्नाद्विद्यावतो निवर्त्तयति प्रतीचश्चेतनस्याधिगमो ज्ञानं स्वरूपतोऽस्य भवति अन्तराया वक्ष्यमाणास्तदभावश्चास्य । विवरणे चैतावदिति स्वभावात्मानं स्वरूपं रूपग्रहणेनाविद्यासमारोपितान्धर्मान्निषे

तज्जपस्तदर्थभावनं प्रणवस्य जपः प्रणवाभिधेयस्य चेश्वरस्य भावनं तदस्य योगिनः प्रणवं जपतः प्रणवार्थं च भावयतश्चित्तमेकाग्रं संपद्यते तथा चोक्तं स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् स्वाध्याययोगसंपत्त्या परमात्मा प्रकाशत इति किं चास्य भवति २८ ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ये तावदन्तराया व्याधिप्रभृतयः ते तावदीश्वरप्रणिधानान्न भवन्ति स्वरूपदर्शनमप्यस्य भवति यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केवलोऽनुपसर्गः तथायमपि बुद्धेः प्रतिसंवेदी पुरुष इत्येवमधिगच्छति २९

ननु निमित्तीश्वरप्रणिधानमीश्वरविषयं कथमिव प्रत्यक्चेतनसाक्षात्कारोत्पत्तिप्रसंगादित्यत आह यथैवेश्वर इति शुद्धः कूटस्थनित्यत्वेनोदयव्ययरहितः प्रसन्नः क्लेशवर्जितः केवलो धर्मापेतः अत एवानुपसर्गः उपसर्गो जात्यायुर्भोगाः सादृश्यपि किंचिद्वैदाधिधानत्वादीश्वराद्भिनत्ति बुद्धेः प्रतिसंवेदीति तदनेन प्रत्यक्स्वरूपग्रहणं व्याख्यातं अस्यैतद्विधर्मितोऽर्थान्तरार्थानुचिन्तनेन न तदितरस्य साक्षात्काराय कल्पते सदृशार्थानुचिन्तनं तु सदृशान्तरसाक्षात्कारोपयोगितामनुभवति एकशास्त्राभ्यास इव ततः सदृशार्थशास्त्रान्तरज्ञानोपयोगितोपपत्त्यासत्तिस्तुल्यात्मसाक्षात्कारहेतुर्न परात्मनीति सर्वमवदातं २९

पा.टी. पश्यति अथ करति सामान्येनोत्तरं प्रवृत्तिविशेषस्यैव पृच्छति क इति उत्तरं व्याधीत्यादिसूत्रं अंतरायाननवरताभ्यसितस्य चित्तस्य योगांतरायाः योगविरोधिनश्चित्तस्य विक्षेपकाः वि
२१ त्तं तन्व मीथ्या ध्यानादयो योगादि लिवंति अपनयंतीत्यपनयंतीति विक्षेपाः योगप्रतिपक्षत्वे हेतुमाह सहैते तरति संशयः भ्रांतिदर्शनेनावहत्तित याप्ति तिरोधप्रपक्षो मे पिनवृत्तमो
व्याधिप्रस्तत्वप्रत्येपि वृत्तिसाहचर्यपीतत्वात्प्रतिपक्षाद्व सर्थः पदादीन्व्याचष्टे व्याधिरिति धातवो वातपित्तश्लेष्माणः शरीरधारणात् अशितपीताहारपरिणामविशेषोर
सः करणानां इंद्रियाणि तेषां वैषम्यं न्यूनाधिकभावः स्त्यानं अकर्मण्यता कर्मानर्हता संशयः उभयकोटिस्पृग्विज्ञानं संभवत्तदुपप्रतिपत्त्वेन संशयविपर्ययोर्भेदेऽभ

अथ केंऽतरायो ये चित्तस्य विक्षेपाः के पुनस्ते कियंतो वेति २८ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्त
विक्षेपास्तेंऽतरायाः नवोऽंतरायश्चित्तस्य विक्षेपाः सहैते चित्तवृत्तिभिर्भवंत्येतेषामभावे न भवंति पूर्वोक्ताश्चित्तवृत्तयः तत्र व्याधिर्धातुरसकरणवैषम्य
स्त्यानमकर्मण्यता चित्तस्य संशयः उभयकोटिस्पृग्विज्ञानं स्यादिदमेवं नैवं स्यादिति प्रमादः शमादिसाधनानामभावनं आलस्यं कायचित्तस्य गुरु
त्वादप्रवृत्तिः अविरतिश्चित्तस्य विषयसंप्रयोगात्मा गर्द्धः भ्रांतिदर्शनं विपर्ययज्ञानं अलब्धभूमिकत्वं समाधिभूमेरलाभः अनवस्थितत्वं लब्धा
यां भूमौ चित्तस्याप्रतिष्ठा समाधिप्रतिष्ठा समाधिप्रतिलंभे हि सति तदवस्थितं स्यादिति एते चित्तविक्षेपा नव योगमलाः योगप्रतिपक्षा योगांतरा
या इत्यभिधीयंते २१
पकोटिस्पर्शी स्वरूपावांतरविशेषविवक्षयात्र भेदेनोपन्यासः अभावनमकरणं तत्राप्रयत्न इति यावत् कायस्य गुरुत्वं कफादिना चित्तस्य गुरुत्वं तमसा गद्धस्त २१
ष्णा मधुमत्यादयः समाधिभूमयः लब्धभूमेर्यदि तावदेवेत्तु स्थितमस्य समाधिरुपायः स्यात्ततस्तस्या अपि भूमेरपायः स्यात् यस्मात्समाधिप्रतिलंभे तदव
स्थितं स्यात्तस्मात्तत्प्रयतितव्यमिति ५२

पा॰टी॰
२१

पश्यति अथ क इति सामान्येनोत्तरं प्रश्न इति विशेषमरब्धेयः पृच्छति के इति उत्तरं व्याधीत्यादिसूत्रं अंतरायानवरताश्चित्तवृत्तयो योगान्तराया योगविरोधिनश्चित्तस्य विक्षेपकाः वि
त्तं तत्त्वमीशाद्धाद्यो योगाद्विलिंपति अपनयंतीत्यपनयंतीति विक्षेपा योगप्रतिपक्षत्वे हेतुमाह सहैते तइति संशयः भ्रांतिदर्शने तावद्वृत्तितया वृत्तिनिरोधपक्षौ मे विनवृत्तो
व्याधिप्रभृतयस्ते पि वृत्तिसाहचर्यात्तत्प्रतिपक्षाद्वा सर्थः पदार्थान्व्याचष्टे व्याधिरिति धातवो वात पित्त श्लेष्माणः शरीरधारणात् अशितपीताहारपरिणामविशेषो र
सः करणानां इंद्रियाणि तेषां वैषम्यं न्यूनाधिकभाव इति अकर्मण्यता कर्मानर्हता संशय उभयकोटिस्पृग्विज्ञानं सप्यत उपशान्तियास्तु तेन संशयविपर्यासयोरभेदे उभ

अथ केंतरायां ये चित्तस्य विक्षेपाः के पुनस्ते कियंतो वेति २८ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्त
विक्षेपास्तेंतरायाः नवांतरायाश्चित्तस्य विक्षेपाः सहैते चित्तवृत्तिभिर्भवंत्येतेषामभावे न भवंति पूर्वोक्ताश्चित्तवृत्तयः तत्र व्याधिर्धातुरसकरणवैषम्य
स्त्यानमकर्मण्यता चित्तस्य संशय उभयकोटिस्पृग्विज्ञानं स्यादिदमेवं नैवं स्यादिति प्रमादः समाधिसाधनानामभावनं आलस्यं कायस्य चित्तस्य गुरु
त्वादप्रवृत्तिः अविरतिश्चित्तस्य विषयसंप्रयोगात्मा गर्द्धः भ्रांतिदर्शनं विपर्ययज्ञानं अलब्धभूमिकत्वं समाधिभूमेरलाभः अनवस्थितत्वं यल्लब्धा
यां भूमौ चित्तस्याप्रतिष्ठा समाधिप्रतिष्ठा समाधिप्रतिलंभे हि सति तदवस्थितं स्यादिति एते चित्तविक्षेपा नव योगमलाः योगप्रतिपक्षा योगांतरा
याः इत्यभिधीयते २१

यकोटिस्पर्शी स्पर्शरूपावांतरविशेषविवक्षया त्वभेदेनोपन्यासः अभावनमकरणं तत्र यत्न इति यावत् कायस्य गुरुत्वं कफादिना चित्तस्य गुरुत्वं तमसा गर्द्धस्तृ २१
ष्णा मधुमत्यादयः समाधिभूमयः लब्धभूमेर्यदि तावन्नैव समुत्थितं मनस्तस्य समाधिभ्रंशः स्यात्ततस्तस्याश्च पिभूमेरपायः स्यात् यस्मात्समाधिप्रतिलंभे तदव
स्थितं स्यात्तस्मात्तत्र प्रयतितव्यमिति ८२

नकेवलंनवान्तरायाःदुःखादयोप्यस्यतत्सहभुवोभवतीत्याह दुःखेत्यादिप्रतिकूलवेदनीयंदुःखं आध्यात्मिकंशारीरंव्याधिवशात् मानसंचकामादिवशात् आधिभौति
कंव्याघ्रादिजनितं आधिदैविकंग्रहपीडादिजनितंतत्त्रेधेदुःखंप्राप्तिमात्रस्यप्रतिकूलत्वेवेदनीयतयाहेयमित्याह येनाभिहताइतिसमाध्यंगपूरकविरोधी अभिद्रुतःप्राणोय

दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासाविक्षेपसहभुवः दुःखमाध्यात्मिकमाधिभौतिकमाधिदैविकंच येनाभिहताःप्राणिनस्तदपघातायप्रयतं
ते तत्दुःखंदौर्मनस्यमिच्छाविघाताच्चेतसःक्षोभः यदंगान्येजयतिकंपयतितदंगमेजयत्वं प्राणोयद्बाह्यंवायुमाचामतिसश्वासः यत्कौष्ठ्यंवायुंनिः
सारयतिसप्रश्वासः एतेविक्षेपसहभुवः विक्षिप्तचित्तस्यैतेभवंतिसमाहितचित्तस्यैतेनभवंति ३१

बाह्यंवायुमाचामतिपिबतिप्रवेशयतीतियावत्सश्वासःसमाध्यंगरेचकविरोधी अविच्छिन्नेपिप्राणोयत्कौष्ठ्यंवायुंनिश्वारयतिनिःसारयतिसप्रश्वासःसमाध्यंग
पूरकविरोधी ३१

पा॰टी॰ उक्तार्थोपसंहारसूत्रमवतारयति अथैत इति अथोक्तार्थानंतरमुपसंहरन्निदं सूत्रमाहेति संबंधः निरोद्धव्यत्वे हेतुरुक्तः समाधिप्रतिपक्षा इति यद्यपीश्वरप्रणि-
२२ धानादिरभ्यासमात्रमुक्तं तथापि वैराग्यमिह तत्सहकारितया ग्राह्यमित्याह ताभ्यामुक्तलक्षणाभ्यामेवाभ्यासवैराग्याभ्यां निरोद्धव्याः तत्र तयोरभ्यासवैराग्ययोर्मध्ये अभ्यास-
स्यानंतरोक्तस्येति तत्प्रतिषेधार्थमित्यादि एकं तत्त्वमीश्वरः प्रकृतत्वादिति वैनाशिकानां मते सर्वमेकाग्रमेव चित्तं नास्ति किंचिद्विक्षिप्तमिति तदुपदेशानां तदर्थानां च प्रवृ-
त्तीनां वैयर्थ्यमित्याह यस्य त्विति यस्य मते प्रत्यर्थे अपि मात्रारकं स्मिन्न नेकस्मिन्वा नियतं यावदर्थविभासमुत्पन्नं तत्रैव समाप्तमनन्यगामि अर्थान्तरे तावत्प्रथमं गृहीत्वा

अथैते विक्षेपाः समाधिप्रतिपक्षाः ताभ्यामेवाभ्यासवैराग्याभ्यां निरोद्धव्याः तत्राभ्यासस्य विषयमुपसंहरन्निदमाह तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः
विक्षेपप्रतिषेधार्थमेकतत्त्वावलंबनं चित्तमभ्यसेत् यस्य तु प्रत्यर्थनियतं प्रत्ययमात्रं क्षणिकं च चित्तं तस्य सर्वमेव चित्तमेकाग्रं नास्त्येव विक्षिप्तं य-
दि पुनरिदं सर्वतः प्रत्याहृत्य एकस्मिन्नर्थे समाधीयते तदा भवत्येकाग्रमित्यतो न प्रत्यर्थनियतं ३२

र्थान्तरमपि पश्यात्तु स्मान्नग्रहणातीत्यत आह क्षणिकं च क्षणस्याभेद्यत्वेन पूर्वापरभावस्याप्यभावः अस्मन्मते त्वक्षणिकं विषये एकस्मिन्ननेकस्मिन्वा नवस्थितं
प्रतिक्षणं मतद्विषयोपादानपरित्यागाभ्यां विषयानियतं विक्षिप्तमनो विक्षेपपरिणामः यतो यदा एकाग्रता आधीयत इति तदुपदेशप्रवृत्तीनामनर्थक्यमित्याह यदि २२
पुनरिदमिति उपसंहरति अतो नेति ३२

वैनाशिकमुखाद्यपयति यो पीतिमात्रादेकस्मिन्क्षणिके चित्तेऽनेकाग्रताधानमपन्नः चित्तसंतानित्वनाद्यावक्षणिके विक्षेपमपनीयैकाग्रताधासन इत्यर्थः तदेतद्दूष्य
दूषयति नस्येति नस्यति नस्यदर्शनेऽपैकाग्रतापादिप्रवाहचित्तस्य चित्तसंतानस्य वा धर्म्मः न चैकं क्रमवद्दुत्पादेषु प्रत्ययेष्वनुगतं नास्ति प्रवाहाच्चित्तं कुतो वयावदस्तित्वस्य
ईस्यक्षणिकत्वाद्दक्षिणिकस्य चासत्वाद्भवतो दर्शनइ इति भावः द्वितीयं कल्पं गृह्णाति अथेति स्रोतवत्त्स्य प्रवाहस्यांशाः प्रत्ययाः परमार्थः सन्तः तस्य प्रत्ययस्यैकाग्रतामपन्नसाध्यो
धर्म्मः दूषयति सर्वैः सीदत् तत्प्रवाहापेक्षया सदृशप्रवाही चाविसदृशप्रवाही वा अन्तःप्य परमार्थसत्तारूपेण प्रत्ययैर्न्नियतत्वाद्यदर्थनियतत्वाद्यदर्थाभासं तं सत्वन्न स्तत्र समाप्त

योपि सदृशप्रत्ययप्रवाहे तानि चित्तमेकाग्रं मन्यते तस्यैकाग्रतापादिप्रवाहचित्तस्य धर्मस्तदेकं नास्ति प्रवाहचित्तं क्षणिकत्वात् अथ प्रवाहांशस्यैव प्रत्य
यस्य धर्मः सर्वः सदृशप्रत्ययप्रवाही वा विसदृशप्रत्ययप्रवाही वा ही वा विसदृशप्रत्ययप्रवाही वा प्रत्यर्थनियतत्वादेकाग्रएवेति विक्षिप्तचित्तानुपपत्तिः त
स्मादेकमनेकार्थमवस्थितं चित्तमिति यदि च चित्तेनैकेनानन्विताः स्वभावभिन्नाः प्रत्यया जायेरन् अथ कथमन्यप्रत्ययदृष्टस्यान्यः स्मर्ता भवेत् अन्यप्र
त्ययोपचितस्य च कर्माशयस्यान्यः प्रत्यय उपभोक्ता भवेत् ७५

त्वादेकाग्र एवेति विक्षिप्तचित्तानुपपत्तिः यद्यनेनैकाग्रताऽर्थो पतइति उपसंहरति तस्मादिति इतोपि चित्तमेकमनेकार्थमवस्थितं चेत्साह यदि चेति यथाहि मैत्रेणाधी
तस्य शास्त्रस्य न चैत्रः स्मरति यथा मैत्रेणोपचितस्य पुण्यस्य पापस्य वा कर्माशयस्य फलं तदसंबंधी चैत्रो न भुंक्ते एवं प्रत्ययान्तरदृष्टस्य प्रत्ययान्तरं न स्मरेत् प्रत्ययान्तरोपचित
स्य वा कर्माशयस्य फलं च न प्रत्ययान्तरमुपभुंजीतेत्यर्थः ७५

पा॰टी॰
२३

ननु नातिप्रसङ्गोऽनेकार्यकारणभावे सतीति विशेषणात् । श्राद्धवैश्वानरीयेष्ट्यादावकर्तृमातृपितृपुत्रादिगामिफलदर्शनात् मधुररसभावितानां आम्रबीजादीनां परंप
रया फलमाधुर्यदर्शनादित्यत आह समाधीयमानमप्येतदिति । अयमभिसंधिः । स्वसंतानवर्त्तिनां प्रत्ययानां संतानांतरवर्त्तिभ्यः प्रत्ययेभ्यो विशेषो येनैकसंतानवर्त्तिना
प्रत्ययेनानुभूतस्योपचितस्य च कर्माशयस्य तत्संतानवर्त्त्येव प्रत्ययः स्मर्त्ता भोक्ता च स्यात् । नान्यसंतानवर्ती नहि संतानो नाम कश्चिदस्ति वस्तुसन् । य एनं संतानिनं
संतानांतरवर्तिभ्यो भिंद्यात् न च कार्यकारणभेदः । किं पायामुपभुञ्जते नवलुडुल्पितो ग्निभावी माणवकः पचति न च कार्यकारणभावसंबंधोपि वास्तवः सहभुवोः सव्येतर
विषाणयोरिवाभावात् असहभुवोरपि प्रत्युत्पन्नाश्रयत्वायोगात् नहि तीतानागतो व्यापारस्य प्रत्युत्पन्नत्वं नैवार्थमनुमहतः तस्मात्संतानेन वा कार्यकारणभावेन वा भाविकेनानुपहि
ताः परमार्थसंतः प्रत्ययाः परस्परासंस्पर्शिनः स्वसंतानवर्तिभ्यः परसंतानवर्तिभ्यो वा प्रत्ययांतरेभ्यो न भिद्यंते सोऽयं गोमयपंचाविहितस्य प्रत्यतो न्यायो गोमयपायसं गव्यत्वादुभय

कथं चित्तसमाधीयमानमप्येतद्गोमयपायसीयं न्यायमाक्षिपति । किं च स्वात्मानुभवापह्नवश्चित्तस्यान्यत्वे प्राप्नोति कथं यदहमद्राक्षं तत्स्पृशामि यच्चास्प्राक्षं तत्प
श्यामीति अहमिति प्रत्ययः सर्वस्य प्रत्ययस्य भेदे सति प्रत्ययिन्यभेदेनोपस्थितः एकप्रत्ययविषयोऽयमभेदात्मा अहमिति प्रत्ययः कथमत्यंतभिन्नेषु चित्तेषु वर्त्तमानः
सामान्यमेकं प्रत्ययिनमाश्रयेत् स्वानुभवग्राह्यश्चायमभेदात्मा अहमिति प्रत्ययः न च प्रत्यक्षस्य माहात्म्यं प्रमाणांतरेणाभिभूयते प्रमाणांतरं च प्रत्यक्षबले
नैव व्यवहारं लभते तस्मादेकार्थमवस्थितं च चित्तं ४६

यत्वादुभयसिद्धं पायसवदिति तमाक्षिपति न्यायामात्येन तलोप्याविकत्वादिति न चात्र कृतनाशाकृताभ्यागमश्चोद्यपतश्चित्तमेव कर्मणां कर्तृ तदेव तज्जनिताभ्यां सुखदुःखाभ्यां
युज्यते सुखदुःखे च विति छायापत्त्येश्चितं भुंक्ते इति पुरुषो भोगाभिमानश्चितिचित्तयोः स्तेदग्रहादिति स्वप्रत्यये प्रतीत्यसमुत्पन्नानां स्वभाववैशेषानात्दशापतरएव स्मरंति फलं चोप
भुंजते न चास्मेन च स्वभावानियोगपर्यनुयोगमर्हति एवं भवतु संभवेतिवाकस्मा नैव मितिचेत् मितपूर्वो कस्य परितुष्यतितं प्रत्याह किंच स्वात्मेति उदयव्ययधर्माणामनुभवा
नामनुभवस्मृतीनां च नानात्वेपि तदाश्रयमभिन्नं चित्तमहमिति प्रत्ययः प्रतिसंदधानः कथमत्यंतभिन्नाश्रयत्वे नालंबतामनुग्रहणात् स्मरणानुरूपकारणभेदात्मनोध्यारोपश्च
रूपविरुद्धधर्मसंसर्गोऽहंप्रत्यभिज्ञानमात्मैकः प्रत्ययः अतः प्रत्ययिनश्चित्तस्यैकतास्यादित्यत आह स्वानुभवेति ननु कारणभेदाद्विरुद्धधर्मसंसर्गावेदकबाधकाद्युक्ता विभ्रमतेत्यत आह न च प्र
त्यक्षस्येति प्रत्यक्षानुसारतएव सामान्यभेदः पारोक्ष्यापरोक्ष्यधर्माविरोधश्चोपपादितो न्यायकणिकायां अक्षरिकस्य चार्थक्रियायामेवकरणिका ब्रह्मतत्त्वसमाक्ष्याभ्यामुपपा

अपरिकर्मितमनसो सत्त्वादिमतः समाधितदुपायसंपन्नतस्मादादौ चित्तप्रसादनोपायान् सूयादिविरोधिनः प्रतिपादयितुमुपक्रमते यथा चित्तस्यावस्थितस्येदं मिति मैत्रीक- रुग
रुणोक्षादिप्रसादनानि सुखितेषु मैत्रीं सौहार्दं भावयत ईर्ष्याकालुष्यं निवर्तते चित्तस्य दुःखितेषु च करुणामात्मनीव परस्मिन् दुःखप्रहाणेच्छां भावयतः परापकारचिकीर्षाकाल-
ष्यं चेतसो निवर्तते पुण्यशीलेषु मुदितां हर्षं भावयतः असूयाकालुष्यं चेतसो निवर्तते अपुण्यशीलेषु चोपेक्षां माध्यस्थ्यं भावयतो मर्षकालुष्यं निवर्तते ततश्चास्य राजसतामस-
धर्मनिवृत्तेः सात्त्विकः शुक्लो धर्म उपजायते सतोत्कर्षसंपन्नः संभवति वृत्ति विरोधपक्षेत्तस्य प्रसादस्वाभाव्याच्चित्तं प्रसीदति प्रसन्नं च वक्ष्यमाणोपायेभ्य एकाग्रं स्थितिप-

यस्य तस्यावस्थितस्येदं शास्त्रेण परिकर्म निर्दिश्यते तत्कथं ३१ मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनं तत्र सर्व-
प्राणिषु सुखसंभोगापन्नेषु मैत्रीं भावयेत् दुःखितेषु करुणां पुण्यात्मकेषु मुदितां अपुण्यशीलेषूपेक्षां एवमस्य भावयतः शुक्लो धर्म उपजायते ततश्च
चित्तं प्रसीदति प्रसन्नमेकाग्रं स्थितिपदं लभते ३२ प्रच्छर्दनविधारणाभ्यां वा प्राणस्य । कौष्ठ्यस्य वायोर्नासिकापुटाभ्यां प्रयत्नविशेषाद्वमनं प्रच्छर्दनं वि-
धारणं प्राणायामः ताभ्यां वा मनसः स्थितिं संपादयेत् ३३

दं लभते अस्यां पुनर्मैत्र्यादिभावनायां न ते उपायाः स्थित्यै कृत्यं तरत्तानिदानां स्थित्युपायानाह प्रच्छर्दनविधारणाभ्यां वा प्राणस्य वाशब्दो वक्ष्यमाणोपायापेक्षो
विकल्पार्थः न मैत्र्यादिभावनापेक्षया तैः सह समुच्चयार्थः प्रच्छर्दनं विरेचनं कौष्ठ्यस्येति प्रयत्नविशेषात् योगशास्त्रविहितात् येन कौष्ठ्यो वायुर्नासिकापुटाभ्यां शनैः रेच्यते
विधारणं विवरणमिति विधारणं प्राणायामः रेचितस्य प्राणस्य कौष्ठ्यस्य वायोर्यदा मा बाहिरेव स्थापनं न तु सहसा प्रवेशनं तदैताभ्यां प्रच्छर्दनविधारणाभ्यां चायोर्लघुकृत-
शरीरस्य मनः स्थितिपदं लभते अत्र चोत्तरसूत्रगता स्थितिनिबंधनीतिपदात् स्थितिग्रहणमाकृष्य संपादयेदित्यर्थः प्राणेन संबध्नीयं ४८

पा॰ २५ स्थित्युपायांतरमाह विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबंधनी व्याचष्टे नासिकाग्रे धारयत इति धारणाध्यानसमाधीन् कुर्वतस्तस्य या दिव्यगंधसंवित्तत्साक्षा
त्कारः एवमन्यास्वपि प्रवृत्तिषु योज्यं एतच्चागमाभ्यस्तेत्तव्यं नोपपद्यतेतः स्यादेतत् किमेतादृग्भिर्वृत्तिभिः कैवल्यप्रत्ययानुपयोगिनीभिरित्यत आह एता वृत्तयो ऽस्य नैव काले नो
त्पन्नाश्चित्तमीश्वरविषयाणां वा विवेकख्यातिविषयाणां वा स्थितौ निबध्नंति न त्वन्यविषया वृत्तिः कथमन्यत्र स्थितिं निबध्नातीत्यत आह संशयं विधमंति अपसारयंति

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबंधनी नासिकाग्रे धारयतो ऽस्य या दिव्यगंधसंवित्सा गंधप्रवृत्तिः जिह्वाग्रे रससंवित् तालुनि रूपसंवित् जिह्वा
मध्ये स्पर्शसंवित् जिह्वामूले शब्दसंविदित्येता वृत्तय उत्पन्नाश्चित्तं स्थितौ निबध्नंति संशयं विधमंति समाधिप्रज्ञायां च द्वारीभवंतीति एतेन चंद्रादित्यग्रह
मणिप्रदीपरत्नादिषु प्रवृत्तिरुत्पन्ना विषयवत्येव वेदितव्या यद्यपि हि तत्तच्छास्त्रानुमानाचार्योपदेशैरवगतमर्थतत्त्वं सद्भूतमेव भवति एतेषां
यथाभूतार्थप्रतिपादनसामर्थ्यात् तथापि यावदेकदेशो ऽपि कश्चिन्न स्वकरणसंवेद्यो भवति तावत्सर्वं परोक्षमिवापवर्गादिषु सूक्ष्मेष्वर्थेषु न दृढां बु
द्धिमुत्पादयति तस्माच्छास्त्रानुमानाचार्योपदेशोपोद्बलनार्थमेवावश्यं कश्चिदर्थविशेषः प्रत्यक्षीकर्तव्यः तत्र तदुपदिष्टार्थैकदेशप्रत्यक्षत्वे सति
सर्वं सुसूक्ष्मविषयमपि आपवर्गाच्छ्रद्धीयते एतदर्थमेवेदं चित्तपरिकर्म निर्दिश्यते अनियतासु वृत्तिषु तद्विषयायां वशीकारसंज्ञायामुपजातायां सम
र्थं स्यात्तस्य तस्यार्थस्य प्रत्यक्षीकरणायेति तथा च सति श्रद्धावीर्यस्मृतिसमाधयो ऽस्याप्रतिबंधेन भविष्यंतीति ३५

अत एव समाधिप्रज्ञायामिति वृत्त्यंतराणामप्यागमसिद्धानां विषयवत्त्वमतिदिशति एतेनेति ननु आगमादिभिरवगतेष्वर्थेषु कुतः संशयापरत्वमित्यत आह यद्य पिहीति श्र
द्धामूलो हि योग उपदिष्टार्थैकदेशप्रत्यक्षीकरणे च श्रद्धातिशयो जायते तन्मूलाभ्यासध्यानादयो ऽस्याप्रत्यूहे भवंतीत्यर्थः ५८

विशोका वा ज्योतिष्मती विगतशोका दुःखरहिता ज्योतिष्मती ज्योतिर् अस्यास्तीति ज्योतिष्मती प्रकाशरूपा हृदयपुंडरीक इति उदरोरसोर्मध्ये यत्पद्मम् अधोमुखं तिष्ठति हृत् अष्ट
दलं रेचकप्राणायामेन तद् ऊर्ध्वमुखं कृत्वा तत्र चित्तं धारयेत् तन्मध्ये सूर्यमंडलं अकारो जागरितस्थानं तस्योपरि चंद्रमंडलं उकारः स्वप्नस्थानं तस्योपरि वह्निमंडलं मकारः सुषुप्ति
स्थानं परं व्योमात्मकं ब्रह्मनादं तुरीयस्थानम् अर्द्धमात्रम् उदाहरंति ब्रह्मवादिनः तत्कर्णिकायाम् ऊर्ध्वमुखी सूर्यादिमंडलमध्यगा ब्रह्मनाडी ततोप्यूर्ध्वं प्रवृत्ता सुषुम्ना नाम ना
डी तया खलु बाह्यान्यपि दानि मंडलानि भिन्नानि तस्मिन् किंचित् स्थानं तस्यां धारयतो योगिनश्चित्तं संविदुपजायते ऽपपत्तिकं बुद्धिसंविद् आकारमादर्शयति बुद्धिस
त्वं तीति आकाशकल्पम् अभिव्याप्तितामात्र हस्तद्वीपादीनां प्रभास्तासां रूपांतरादाकारेण विकल्प्यते नानारूपा भवति मनुस्तत्र बुद्धिरस्मि मतं तेन तु महत्तत्वे तस्य वै सुषुम्ना स्व

विशोका वा ज्योतिष्मती प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबंधनीत्यनुवर्तते हृदयपुंडरीके धारयतो या बुद्धिसंवित् बुद्धिसत्वं हि भास्वरमाकाशकल्पं तत्र स्थिति
वैशारद्यात् प्रवृत्तिः सूर्येंदुग्रहमणिप्रभारूपाकारेण विकल्पते तथास्मितायां समापन्नं चित्तं निस्तरंगमहोदधिकल्पं शांतमनंतमस्मितामात्रं भवति य
त्रेदमुक्तं तमणुमात्रमात्मानमनुविद्यास्मीत्येवं तावत्संप्रजानीत इत्येषा द्वयी विशोका विषयवती अस्मितामात्रा च प्रवृत्तिर्ज्योतिष्मतीत्युच्यते यया यो
गिनश्चित्तं स्थितिपदं लभत इति ३५

वैकारिकाहंकारजन्मनः सत्वबहुलतया ज्योतीरूपता विवक्षिता तस्य हि विषयगोचरतया व्याप्तित्वमपि सिद्धं अस्मिताकार्यमस
न्निसमापत्तिं दर्शयित्वा ऽस्मितासमापन्नस्य रूपमाह तथेति शांतम् अपगतरजस्तमः अनंतं व्याप्तिः अस्मितामात्रं न पुनर्नानाप्रभारूपं आगमांतरेण स्वमतं
समीकरोति यत्रेदमुक्तं पंचशिखेन तमणुं हृदिगमत्वा आत्मानं महत्कारस्य दमनुविद्यानुचिंत्यास्मीत्येवं तावज्जानीत इति स्यात्तदेतत् नानाप्रभारूपा भवतु ज्योतिः कथं अ
स्मितामात्ररूपा ज्योतिष्मतीत्यत आह एषा द्वयीति विगतरजस्तमोमलोऽस्मितैव सत्वमयी ज्योतिरिति भावः द्विविधायाः अपि ज्योतिष्मत्याः फलमाह ययेति ४०

पा॰ टी॰ २५ वीतरागविषयं वा चित्तं वीतरागाः शुक्लदेहपापनप्रमत्तवस्तेषां चित्तं तदेवालंबनं तेनोपरक्तमिति स्वप्नविद्राज्ञानालंबनं वा यदा खल्वपि स्वप्ने विविक्तवनसंनिवेशवर्तिनीमु हीर्त्वामिव चंद्रमंडलात्कोमलमृणालशकलानुकारि गिरिंगप्रत्यंगे हृद्येतामभिजातचंद्रकांतमणिमयीमतिसुरभिमालतीमल्लिकामालाहारिणीं मनोहरां भगवतो महेश्वरस्य प्रतिमामाराधयन्नेव प्रबुद्धः प्रसन्नमनास्तदा तामेव स्वप्नज्ञानालंबिनीभूतामनुचिंतयतस्तस्य तदेकाकारमनस्तत्रैव चितत स्थितिपदं स्थितिपदं लभते नि

विरतरागविषयं वा चित्तं वीतरागचित्तालंबनोपरक्तं वा योगिनश्चित्तं स्थितिपदं लभत इति ३७ स्वप्ननिद्राज्ञानालंबनं वा स्वप्नज्ञानालंबनं निद्राज्ञानालंबनं वा तदाकारं योगिनश्चित्तं स्थितिपदं लभत इत्यर्थः ३८ यथाभिमतध्यानाद्वा यदेवाभिमतं तदेव ध्यायेत् तत्रालब्धस्थितिकमन्यत्रापि स्थितिपदं लभत इति ३९ परमाणुपरममहत्त्वांतोऽस्य वशीकारः सूक्ष्मे निविशमानस्य परमाण्वंतं स्थितिपदं लभत इति स्थूले निविशमानस्य परममहत्त्वांतं स्थितिपदं चेतसः एवं तामुभयकोटिमनुधावतो योऽस्याप्रतीघातः स वशीकारः तद्वशीकारत्परिपूर्णं योगिनश्चित्तं न पुनरभ्यासकृतं परिकर्मापेक्षत इत्यर्थः ४०

ग्रावेहसात्विकी ग्रहीतव्यापस्या प्रबुद्धसुखमहसमस्वाक्षमिति प्रत्ययमर्थो भवति एकाग्रतेन तस्यामनो भवति तावन्मात्रेणाचोक्तं एतदेव ब्रह्मविदो ब्रह्मरागे रूपमुदाहरं २५
ति सुखावस्थिति ज्ञानं च जपे परहितं नशक्यं गोचरयितुमिति जेपमपि गोचरीक्रियते यथाभिमतध्यानाद्वा किं बहुना यदेवाभिमतं तत्तदेव तात्पर्यमिति कथं पुनः स्थितिपद साक्षीभावो वगंतव्य इत्यत आह परमाणुपरममहत्त्वांतोऽस्य वशीकारः व्याचष्टे सूक्ष्म इति उक्तमर्थं पिंडीकृत्य वशीकारपदार्थमाह एवं तामनुभयामिति वशीकारस्यांतर फलमाह तद्वशीकारादिति ४०

अत्राग्रे ग्रंथ स्त्रुटितः

तृतीयपाद
त्रयोदश
सूत्रमारभ्य
ग्रंथः

प्रासंगिकं च वक्ष्यमाणोपयिकं च भूतेन्द्रियपरिणामं विभजते एतेन । व्याचष्टे एतेनेति । ननु चित्तपरिणाम इति मात्रमुक्तं न तु तत्प्रकारा धर्मलक्षणावस्थापरिणामाः तत्कथं तेषा
मतिदेश इत्यत आह तत्र व्युत्थाननिरोधयोरिति धर्मलक्षणावस्थाशब्दाः परं नोक्ता न तु धर्मलक्षणावस्था नोक्ता इति संक्षेपार्थः तथा हि व्युत्थाननिरोधसंस्कारयोरित्यत्रैव सूत्रे ध
र्मपरिणाम उक्तः इमं च धर्मपरिणामं दर्शयता तेनैव धर्मीकरणो लक्षणपरिणामोऽपि सूचित एवेत्याह लक्षणपरिणामपरिणामा इति । लक्ष्यतेनेनेति लक्षणं कालभेदस्तेन हि लक्षितं ५
वस्तु वस्त्वन्तरेभ्यः कालान्तरयुक्तेभ्यो व्यवच्छिद्यत इति निरोधस्त्रिलक्षणः अस्यैव व्याख्यानं त्रिभिरध्वभिर्युक्तः अध्वशब्दः कालवचनः स खल्वनागतं लक्षणमध्वानं प्रथमं हित्वा तत त
किमध्वद्धर्मत्वमपि त्यजतीत्यत आह धर्मत्वमनतिक्रान्तो वर्तमानलक्षणं प्रतिपन्नः यदेव निरोधोऽनागत आसीत्स एव संप्रति वर्तमानो न तु निरोधः अनिरोध इत्यर्थः वर्तमानतारूपमा

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥१३॥ एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेण भूतेन्द्रियेषु धर्मपरिणामो लक्षणपरिणामोऽ
वस्थापरिणामश्चोक्तो वेदितव्यः तत्र व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावौ धर्मिणि धर्मपरिणामः लक्षणपरिणामश्च निरोधस्त्रिलक्षणस्त्रिभिरध्वभि
र्युक्तः स खल्वनागतलक्षणमध्वानं प्रथमं हित्वा धर्मत्वमनतिक्रान्तो वर्तमानलक्षणं प्रतिपन्नः यत्रास्य स्वरूपेणाभिव्यक्तिरेषोऽस्य द्वितीयोऽध्वा न चातीतानागताभ्यां ल
क्षणाभ्यां विमुक्तः तथा व्युत्थानं त्रिलक्षणं त्रिभिरध्वभिर्युक्तं वर्तमानलक्षणं हित्वा धर्मत्वमनतिक्रान्तमतीतलक्षणं प्रतिपन्नम् एषोऽस्य तृतीयोऽध्वा न चाना
गतवर्तमानाभ्यां लक्षणाभ्यां विमुक्तं एवं पुनर्व्युत्थानमुपसंपद्यमानमनागतलक्षणं हित्वा धर्मत्वमनतिक्रान्तं वर्तमानलक्षणं प्रतिपन्नं यत्रास्य स्वरूपाभिव्यक्तौ स
त्यां व्यापारः एषोऽस्य द्वितीयोऽध्वा न चातीतानागताभ्यां लक्षणाभ्यां विमुक्तमिति एवं पुनर्निरोध एवं च पुनर्व्युत्थानमिति ५

रूपानं यत्रास्य स्वरूपेणास्योचितार्थक्रियाकारित्वरूपेणाभिव्यक्तिः समुदाचारः स एषोऽस्य प्रथममनागतमध्वानमपेक्ष्य द्वितीयोऽध्वा स्यादेतत् अनागतमध्वानं हित्वा चेद्वर्तमानता
मापन्नस्तावद्धित्वा अतीततामापत्स्यते हन्त भोः अध्वनामनुत्पादनाशौ स्याताम् न चैष्यतेऽनभ्युपगमात् उत्पादो नाभिमतो विनाशश्चेत्यत आह न चातीतानागताभ्यां सामान्यात्मनावच्छिन्नाभ्यां
विमुक्त इति अनागतस्य निरोधस्य वर्तमानतालक्षणं दर्शयित्वा वर्तमानव्युत्थानस्यातीततां तृतीयमध्वानमाह तथा व्युत्थानमिति तत्किं निरोध एवानागतो न व्युत्थान
मित्याह एवं पुनर्व्युत्थानमिति व्युत्थानजातमपेक्ष्य पुनर्भावः न व्यक्तापेक्षया न ह्यतीतं पुनर्भवतीति स्वरूपाभिव्यक्तिरर्थक्रियाक्षमत्वाविर्भावः सर्वेषां लक्षणपरिणाम उक्तस्तज्जा

पा॰टी॰ त
ती॰ ६० कद:

धर्मपरिणामं महत्त्वितमेवावस्थापरिणाममाह तथेति धर्माणां वर्त्तमानानाध्वनां बलवत्त्वाबलवत्त्वे वस्थानस्याः प्रतिलक्षणं नारतम्यं परिणामः उपसंहरति एष इति परिणामभेदानां सं
वेधभेदान्निर्दिश्य तितमानुभवानुसारात् धर्मिणा इति तान्किमेष परिणामो गुणानां का द्वाचित्कोनेत्याह एवमिति कुम्भात्सुनरयं परिणामः सदातन इत्यत आह चतीति चोहेस्य
र्थः वर्त्तमानचारः एतदेव कुत इत्यत आह गुणस्वाभाव्यमिति उक्तमत्रैव पुरस्तात् सोऽयं त्रिविधोपि चित्तपरिणामो भूतेन्द्रियेषु सूत्रकारेणानिर्दिष्ट इत्याह एतेनेति एवं धर्मधर्मि
भेदो धर्मद्धर्मिणो भेदमालक्ष्य तत्र भूतानां पृथिव्यादीनां धर्मिणां गवादिर्घटादिर्वा धर्मपरिणामो धर्माणां चातीतानागतवर्त्तमानरूपता लक्षणपरिणामः वर्त्तमानलक्ष
णापन्नस्य गवादेर्बाल्यकौमारयौवनवार्द्धकमवस्थापरिणामो घटादीनामपि नवपुरातनावस्थापरिणामः एवमिन्द्रियाणामपि धर्मिणां नेत्रादीनां नीलाद्यालोचनं धर्मस्य वर्त्तमानता

तथावस्थापरिणामः तत्र निरोधलक्षणेषु निरोधसंस्कारा बलवन्तो भवन्ति दुर्बला व्युत्थानसंस्कारा इति दुर्बला व्युत्थानसंस्कारा इति एष धर्माणामवस्थापरिणा
मवस्थापरिणामः तत्र धर्मिणो धर्मैः परिणामो धर्माणां त्र्यध्वनां लक्षणैः परिणामो लक्षणानामप्यवस्थाभिः परिणाम इत्येवं धर्मलक्षणावस्थापरिणामैः शून्यं
न क्षणमपि गुणवृत्तमवतिष्ठते चलं च गुणवृत्तं गुणस्वाभाव्यं तु प्रवृत्तिकारणमुक्तं गुणानामिति एतेन भूतेन्द्रियेषु धर्मधर्मिभेदात्त्रिविधः परिणामो वेदितव्यः प
रमार्थतस्त्वेक एव परिणामः धर्मिस्वरूपमात्रो हि धर्मो धर्मिविक्रियैवैषा धर्मद्वारा प्रपञ्च्यत इति तत्र धर्मस्य धर्मिणि वर्त्तमानस्यैवाध्वस्वतीतानागतवर्त्तमानेषु भावा
न्यथात्वं भवति न द्रव्यान्यथात्वं यथा सुवर्णभाजनस्य भित्त्वान्यथाक्रियमाणस्य भावान्यथात्वं भवति न सुवर्णान्यथात्वमिति ६

दिलक्षणपरिणामो वर्त्तमानलक्षणापरिणामो वर्त्तमानलक्षणस्य रूपाद्यालोचनस्य स्फुटत्वास्फुटत्वादिरवस्थापरिणामः सोऽयमेवंविधो भूतेन्द्रियपरिणामो धर्मिणो धर्मै
र्लक्षणावस्थानां भेदमाश्रित्य वेदितव्यः अभेदमाश्रित्याह परमार्थतस्त्विति तु शब्दो भेदपक्षाद्विशिनष्टि पारमार्थिकत्वमस्य ज्ञाप्यते न तत्त्वस्य परिणाममतिविस्तृतेरुक्तो धर्मि
स्वरूपमात्रो हीति ननु पृथग्धर्मिविक्रियैव धर्मः कथमसंकरप्रसङ्गो लोके परिणामे चित्तत्राह धर्मद्वारेति धर्मलक्षणावस्थाः परिणमन्ते तद्द्वारेण धर्मिण एव विक्रियेत्यसंक
रोऽसंकीर्णाश्च द्वारेणाभेदेऽपि धर्मिणः परस्परासंकरात् ननु धर्माणामभिन्नत्वे धर्मिणो ध्वनां च भेदे धर्मिणोऽन्यत्वेन धर्मेणापीह धर्मिवदवितव्यमित्याह तत्र धर्मस्येति
भावः संस्थानभेदः सुवर्णादेर्यथाभाजनस्य रुचकस्वस्तिकव्यपदेशभेदो भवति न तस्मात्प्रमेयो भवति न तु द्रव्यं सुवर्णमिव सुवर्णतामुपैति अर्थस्य तभेदाभावादिति वक्ष्यमाणा

पातंजलयोग सूत्रभाष्यस टीक प्रथमा ध्यायः समा धिपादः प्रथमः पंचविंशतिप त्रात्मिक श्री अन्ते टीकानीयपादत्रयोद शसूत्रमारभ्य योऽलिखितोऽसि ग्रंथः

श्री ६०
राम

एकांतवादिनां बौद्धमुपस्थापयति अपर आहेति धर्मा एव हि रुचकादयस्तथोत्पन्नाः परमार्थसंतो न पुनः सुवर्णं नाम किंचिदेकमनेकेष्वनुगतं द्रव्यमिति यदि पुनर्निवर्तमानेष्वपि
धर्मेषु द्रव्यमनुगतं भवेत्ततो न चितिशक्तिवत्परिणमेत् तत्रापि तु कैवल्ये कौटस्थ्येन परिवर्तेत परिणामात्मकं रूपं परिहाय रूपांतरेण कौटस्थ्येन परिवृत्तिः यथा चितिशक्तिरन्यथाभावं भजमानेष्वपि
धर्मेषु स्वरूपादप्रच्युता कूटस्थनित्या एवं सुवर्णाद्यपि स्यात् न चैष्यते तस्मान्न द्रव्यमतिरिक्तं धर्मेभ्य इति परिहरति अयमदोषः कस्मादेकांतानभ्युपगमात् यदि चितिशक्ते
रिव द्रव्यस्यैकांतिकीं नित्यतामभ्युपगच्छेम ततस्त्वमेवमुपालंभमर्हसि न त्वैकांतिकीं नित्यतामातिष्ठामहे किंतु तदेतत्त्रैलोक्यं ननुरव्यमानो व्यक्तेरर्थक्रियाकारिणो रूपादपैति
कस्मान्नित्यत्वप्रतिषेधात् प्रमाणेनोपदिष्टं हि घटोऽयं कैर्नोपेयमानः कपालाशहेतूनां च संनिधाने स्वपि येऽत्यो घट इति एवं व्युपलब्ध्यर्थक्रियेयं क्रियेकुर्वीत स्यादनित्यस्त्रैलोक्यं
अस्तु तर्हि नित्यमेवोपलब्ध्यर्थक्रियारहितत्वेन गगनारविंदवदित्युच्छत्वादिस्यत आह अपेतमप्यस्ति नास्य तु तुच्छतापत्तेरेकांततो नित्यस्यादित्यर्थः कस्माद्विनाशप्रति

अपर आह धर्मानभ्यधिको धर्मी पूर्वतत्त्वानतिक्रमात् पूर्वापरावस्थाभेदमनुपतितः कौटस्थ्येन विपरिवर्तेत यद्यन्वयी स्यादिति अयमदोषः कस्मात् एकांतता
नभ्युपगमात् तदेतत्त्रैलोक्यं व्यक्तेरपैति नित्यत्वप्रतिषेधात् अपेतमप्यस्ति विनाशप्रतिषेधात् संसर्गाच्चास्य सौक्ष्म्यं सौक्ष्म्याच्चानुपलब्धिरिति लक्षणपरिणामो धर्मो
ऽध्वसु वर्त्तमानोऽतीतो लक्षणयुक्तोऽनागतवर्त्तमानाभ्यां लक्षणाभ्यामवियुक्त इति तथा वर्त्तमानो वर्त्तमानोभ्यां लक्षणाभ्यामवियुक्त इति तथा वर्त्तमानो वर्त्तमानल
क्षणयुक्तोऽतीतानागताभ्यां लक्षणाभ्यामवियुक्त इति तथानागतोऽनागतलक्षणयुक्तो वर्त्तमानातीताभ्यां लक्षणाभ्यामवियुक्तः यथा पुरुष एकस्यां रक्तो

षेधात् प्रमाणेन तथा हि यत्तुच्छं न तत्कदाचिदप्युपलब्ध्यर्थक्रिये करोति यथा गगनारविंदं करोति चैतत्त्रैलोक्यं कदाचिदुपलब्ध्यर्थक्रिये न शेषासु विरक्तो भवतीति ७
कोटिप्यागगनारविंदं करोति चैतत्त्रैलोक्यं कदाचिदुपलब्ध्यर्थक्रिये इति तथोत्पत्तिद्रव्यत्वधर्मलक्षणावस्थायोगित्वात् योऽप्यंशस्तत्तुच्छगगनतनलिननविषाणादिवावृत्तः स
द्भेतदुपाव्यौ तथा च धर्माणां तैर्निरूपेण चितिशक्तिवत्कूटस्थनित्यः स्यात् किंतु केषांचिन्नित्यः तथा च परिणामीति सिद्धं गतेन नसन्तिरुद्धवस्थासु कार्याणां घटादीनामनाग
तानां सत्त्वं वेदितव्यं स्यादेतत् अपेतमपि चेदस्ति कस्मात्स्वरूपेणोपलभ्यत आह संसर्गात्स्वकारणलयात् सौक्ष्म्यं दर्शनोनहेतुत्वं ततश्चानुपलब्धिरिति तदेवं धर्मपरिणामे सम
र्थ्य लक्षणपरिणाममपि लक्षणानां परस्परानुगमेनेत्समर्थयते लक्षणपरिणाम इति एकैकलक्षणं लक्षणांतराभ्यामप्यनुगतमिति सर्वार्थः न त्वेकलक्षणयोगे लक्षणांत
रेनानुभव इति तत्त्वमपेतयोग इत्यत आह यथा पुरुष इति न ह्यनुभवाभावः प्रमाणसिद्धमपलपति तदुत्पाद एव तत्र तत्सद्भावे प्रमाणं समस्तं तस्मादसंभवात् नरविषाणवदिति ७

पा॰टी॰
६१

परोक्तं दोषमुद्भावयति अत्र लक्षणपरिणाम इति पदार्थधर्मो वर्त्तमानत्वदेव घटतीतोऽनागतश्च तदा त्रयोऽप्यध्वानः संकीर्येरन्नित्यनुक्रमेणाध्वं नाभावे असदुत्पादप्रसंग इति भावः
परिहरति तस्य परिहार इति वर्त्तमानत्वेव हि धर्मिणामनुभवसिद्धा ततः प्राक्पश्चात् काल संबंधमवगमयति न खल्वसदुत्पद्यते न च सद्विनश्यतीति तदिदमाह एवं हि न चित्तमिति क्रोधो
नरकालेऽपि चितेरागधर्मकमनुभूयते यदा तु रागः क्रोधसमये नागतत्त्वेन नासीत् कथमसावुत्पद्येत अनुत्पन्नश्च कथमनुभूयेतेति भवत्येवं तथापि कुतोऽध्वनामसंकर इत्यत
घटति किंचेति किं कारणमसंकरे वा पुनरर्थे उत्तरमाह स्वयमात्मलक्षणलक्षणानां युगपत्तास्ति संभवः कस्मिन्नेकस्मिन्नवतौ क्रमेणानुलक्षणानामेकस्य स्वलक्षणस्य कोऽजन
स्वभावो भवेत् संभवेत् लक्ष्याधानमिरूपणात् मालक्षणानां लक्ष्याकारेणात्र दृष्टान्ते चपेचशिखाचापसंभेतिम हठक्तं चेति एतच्च प्रागेव व्याख्यातं उपसंहरति तस्मादिति
आविर्भावतिरोभावरूपविरुद्धधर्मसंसर्गाद्संकरोऽध्वनामिति दृष्टान्तमाह यथा रागस्येति पूर्वं क्रोधस्य रागसंबंधावगमो दर्शितः इतरेदानीं तु विषयान्तरवर्त्तिनो रागस्य विषयां

अत्र लक्षणपरिणामे सर्वस्य सर्वलक्षणयोगादध्वसंकरः प्राप्नोतीति परैर्दोषश्चोद्यत इति तस्य परिहारः धर्माणां धर्मत्वमप्रसाध्यं सति च धर्मत्वे लक्ष
णभेदोऽपि वाच्यो न वर्त्तमानसमय एवास्य धर्मत्वं एवं हि न चित्तं रागधर्मकं स्यात् क्रोधकाले रागस्यासमुदाचारादिति किं च त्रयाणां लक्षणानां युगपदेकस्यां व्य
क्तौ नास्ति संभवः क्रमेण तु स्वव्यंजकाञ्जनस्य भावो भवेदिति उक्तं च रूपातिशया वृत्त्यतिशयाश्च विरुध्यन्ते सामान्यानि त्वतिशयैः सह प्रवर्त्तन्ते तस्मादसंक
रः यथा रागस्यैव क्वचित् समुदाचार इति न तदानीमन्यत्राभावः किंतु केवलं सामान्येन समन्वागत इत्यस्ति तदा तत्र तस्य भावः तथा लक्षणस्येति न धर्मी
त्र्यध्वा धर्मास्तु त्र्यध्वानस्ते लक्षिता अलक्षिताश्च तां तामवस्थां प्राप्नुवन्तोऽन्यत्वेन प्रतिनिर्दिश्यन्तेऽवस्थान्तरतो न द्रव्यान्तरतः ८

तेतरवर्त्तिनो रागस्य विषयान्तरवर्त्तिना रागान्तरेण संबंधावगम इति दार्ष्टान्तिकमाह तथा लक्षणस्येति ननु सत्यमनेकान्ताभ्युपगमेऽभेदोऽस्तीति धर्मलक्षणावस्थान्यत्वे तद्भि
न्नस्य धर्मिणोऽन्यत्वप्रसंगः स एव च नेष्यते तदनुगमानुभवविरोधादित्यत आह धर्मी न त्र्यध्वा धर्मास्तु त्र्यध्वानः धर्माणामध्वत्रयप्रयोगमेव स्फोरयति ते लक्षिता अभिव्य
क्ता वर्त्तमाना इति यावत् अलक्षिताश्च व्यक्ता अनागता अतीता इति यावत् तत्र लक्षितास्तां तामवस्थां वर्त्तमानत्वादिकां प्राप्नुवन्तोऽन्यत्वेन प्रतिनिर्दिश्यन्ते अवस्थान्तरतो
न द्रव्यान्तरतः अवस्थाशब्देन धर्मलक्षणावस्था उच्यन्ते एतदुक्तं भवति अनुभव एव हि धर्मिणो धर्मादीनां भेदाभेदावुपपादयति न ह्येकान्तिकेऽभेदे धर्मादीनां धर्मि
रूपवत् धर्मादित्वं नाप्येकान्तिके भेदे गवाश्ववत् धर्मादित्वं स चानुभवो नैकान्तिकत्वे भवत्युपपद्यते अपि धर्मादिरूपजनापायकर्मकत्वे धर्मिणामेकमनुगमयन्नेधर्मत्रियमस्पर

तो यावत्तत्परस्परमनुभूयत इति तदनुसारितो
वयं न तन्मातिवर्त्याम यथा धर्मानुभवो न यथावस्था
पितु धीश्रम ह इति ८

अत्रैव लौकिकं दृष्टांतमाह यथैकारेखेति यथा तदेव रेखा स्वरूपं तत्तत्स्थानापेक्षया शतादित्वेन व्यपदिश्यते एवं तदेव धर्मिरूपं तद्धर्मलक्षणावस्थाभेदेनोन्मत्वेन प्रतिनिर्दिश्यत इत्यर्थः दार्ष्टा
न्तिकार्थे दृष्टांतांतरमाह यथा चैकत्वेपीति स्त्र्यंतरेपक्षो कंरो यमुस्तापपति अवस्थेति अवस्थापरिणामे धर्मलक्षणावस्थापरिणामे॰ कौटस्थ्यदोषप्रसंग उक्तो धर्मिधर्मलक्षणावस्थानां पञ्चति
कथमिति उत्तरं · अध्वनो व्यापारेण तिरोहितः किल योऽनागतो व्यापारं करोति सन्वर्तमानत्वं तेनाव्यवहितत्वाद्धेतोः पदार्थधर्मो दधि लक्षणाः स्वव्यापारं दाधिकाद्याधारं मंक्षीरं सत्रापि न करो
तीत्यहो अनागतः पदा करोति तदा वर्तमानः पदा कृत्वा निवृत्तः सन्नेव स्वव्यापाराद्दाधिकाद्याधारं भात्तदातीत इति एवं नैकान्येपि सत्वाद्धर्मधर्मिणोर्लक्षणानामवस्थानां च कौटस्थ्यमाप्नोतिस
दासत्ता हि नित्यत्वं चंतु गोमपि चसर्वदा सत्वेवानोत्पादः नाबन्धात्रं च लक्षणां कूटस्थनित्यताया: नहि चित्तिशक्तेरपि कूटस्थनित्यताया: काश्चिदन्यो विशेष इति भावः परिहरति नास्तो दोषकस्मा
त् गुणिनित्यत्वेपि गुणानां विमर्दवैचित्र्यात् भावकत्वं तस्यैव विभागत्तर तद्वैतं भवति यथा पि सर्वदा सत्वं च ठगमपि पिगुणानां तथापि गुणविमर्दवैचित्र्येण तदात्मभूततद्विकाराविर्

यथैकारेखा शतस्थाने शतं दशस्थाने दश एका चैकस्थाने यथा चैकत्वेपि स्त्री माता चोच्यते दुहिता च स्वसा चेति अवस्थापरिणामे कौटस्थ्यप्रसंगदोषः कैश्चिदुक्तः
ध्वनो व्यापारेण व्यवहितत्वात् यदा धर्मः स्वव्यापारं न करोति तदानागतः यदा करोति तदा च वर्तमानः यदा कृत्वा निवृत्तस्तदातीत इत्येवं धर्मधर्मिणोर्लक्षणानामवस्थानां च कौटस्थ्यं
प्राप्नोतीति परैर्दोष उच्यते नासौ दोषः कस्मात् गुणिनित्यत्वेपि गुणानां विमर्दवैचित्र्यात् यथा संस्थानमादिमत्धर्ममात्रं शब्दादीनां विनाश्यविनाशिनां एवं लिंगमादिमद्ध
र्ममात्रं सत्वादीनां गुणानां विनाश्यविनाशिनां तस्मिन्विकारसंज्ञेति तत्रेदमुदाहरणं मृद्धर्मी पिंडाकाराद्धर्मांतरमुपसंपद्यमानो धर्मतः परिणमते घटाकार इति घटा
कारोनागतं लक्षणं हित्वा वर्तमानलक्षणं प्रतिपद्यत इति लक्षणतः परिणमते घटो नवपुराणतां प्रतिक्षणमनुभवन्नवस्थापरिणामं प्रतिपद्यत इति धर्मिणोपि धर्मांतरमवस्था धर्मस्यापि लक्ष
णांतरमवस्थेत्येक एव द्रव्यपरिणामो भेदेनोपदर्शित इति एवं ~~स्वरूपं धर्मभिन्नं सो धर्मान्तरे~~ पदार्थांतरेष्वपि योज्यमिति त एते धर्मलक्षणावस्थापरिणामा धर्मिस्वरूपमनतिक्रांता इत्येक एव परि
णामः सर्वानमून् विशेषानभिप्लवते अथ कोयं परिणामः अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मांतरोत्पत्तिः परिणाम इति १३ ।

भवितिरोभावभेदेन परिणामशालित्वयापानकौटस्थ्यमिति शक्तेस्तु न स्वात्मभूतविकाराविर्भावतिरोभावरतिकौटस्थ्यं यथाह: नित्यं तमाह विद्वांसोपत्स्वभावो न नश्यतीति विमर्दवैचित्र्यमेव विका
रवैचित्र्ये हेतुं विहत्तेमहत्तो च दर्शयति यथा संस्थानेपृथिव्याः परिणामलक्षणं आदिमद्धर्ममात्रं विनाशितिरोभावि शब्दादीनां शब्दस्पर्शरूपादिधर्मद्रव्याणां स्वकार्यमपेक्ष्य विनाशिनामतिरोभा
विनां हेतोर्दर्शयति एवं लिंगमिति तस्मिन्विकारसंज्ञा न त्वेव च विकारवती चितिशक्तिरिति भावः तदेव परीक्षकसिद्धं विहत्तिमहत्वं तं दोदाहरणे विकृतादेव लोकसिद्धायां गुणाविमर्द॰ वैचित्र्य
धर्मलक्षणावस्थापरिणामवैचित्र्ये हेतुमुदाहरतीति तत्रेदमुदाहरणमिति नवापनिवमोलक्षणावस्थापरिणामान्यस्वरूपामरति। सर्वेषामेव धर्मलक्षणावस्थाभेदानामवस्थाशब्दवाच्यता

यस्यैष चित्रविधः परिणामस्तं धर्मिणां सूत्रेण लक्षयति शांतोदिताव्यपदेश्यधर्मानुपाती धर्मी धर्मोऽस्यास्तीति धर्मी तेन विज्ञाते धर्म्यैशे शक्यो ज्ञातुमिति धर्मं दर्शयति योग्यतेति
धर्मिणो द्रव्यस्य मृदादेः शक्तिरेव चूर्णपिंडघटाद्युत्पत्तिशक्तिरेव धर्मस्ते पांत चाव्यक्तत्वेन भावरूपतया वर्त्तते नन्वेवमप्यक्तत्वया संतस्ते ततः प्रादुर्भवंतु उदकाहरणादयस्तेनैस्य का
रणादन्यासाहिताः कुतः प्रासादस्य तउक्तं योग्यतावच्छिन्नेति यासौ घटपदीनामुत्पत्तिशक्तिः सोदकाहरणादियोग्यतावच्छिन्ना तेनोदकाहरणादयोपि घटपदिभिः स्वकारण
देव प्राप्ता इति नाकस्मिका इति भावः अथवा केषां धर्मिणा इत्यत्रोत्तरं योग्यतावच्छिन्ना धर्मिणा इति को धर्म इत्यत्रोत्तरं शक्तिरेव धर्म इति तेषां मोऽप्यनेनैव धर्म इत्यर्थः अत एव तद्द्वारा तु धर्मीति
सिद्धं भवति तत्र संक्षेपमात्राप्याह स च फलप्रसवभेदानुमितएकस्य धर्मिणोऽभ्यामश्चबहूनामपिंडघटादिरूप इत्यर्थः ॥ कार्यभेददर्शनाद्यभिन्न इति यावत् परिदृष्टमुपलब्धं तत्रा

तत्र शांतोदिताव्यपदेशकधर्मानुपाती धर्मी योग्यतावच्छिन्ना धर्मिणः शक्तिरेव धर्मः स च फलप्रसवभेदानुमितसद्भावः एकस्यान्योन्यश्च परिदृष्टः तत्र वर्त्तमानः स्वव्यापारमनु
भवन्धर्मी धर्मांतरेभ्यः शांतेभ्यश्चाव्यपदेश्येभ्यश्च भिद्यते यदा तु सामान्येन समन्वागतो भवति तदा धर्मिस्वरूपमात्रत्वात् कोसौ केन भिद्येत तत्र ये खलु धर्मिणो धर्माः
शांता उदिता अव्यपदेश्याश्चेति तत्र शांता ये कृत्वा व्यापारानुपरताः सव्यापारा उदिताः ते चानागतस्य लक्षणस्य समनंतरा वर्त्तमानस्यानंतरा अतीताः किमर्थमतीतस्या
नंतरा न भवंति वर्तमानाः पूर्वपश्चिमताया अभावात् यथानागतवर्त्तमानयोः पूर्वपश्चिमता नैवमतीतस्य तस्मान्नातीतस्यास्ति समनंतरः तदनागत एव समनं
तरो भवति वर्त्तमानस्येति १०

नुभवाराहिरणो वर्त्तमानस्य मृत्पिंडस्य शांताव्यपदेश्याभ्यां मच्चूर्णमद्घटाभ्यां भेदमाह तत्र वर्त्तमान इति यदि न भिद्येत पिंडवच्चूर्णघटयोरपि तद्देशस्वव्यापारव्यापत्प्रसंग इति भावः
अव्यक्तस्य तु पिंडस्य नोक्तभेदसाधनमस्तीत्याह यदा त्विति कोसौ केन भेदसाधनेन भिद्येतेति तदेवं भेदसाधनमभिधाय तं भेदं विभजते तत्र ये खल्विति उदिता इति व
र्त्तमाना इत्यर्थः अत्र व्युत्क्रमबोधनीयं पक्षपतिते चेति चोदयति किमर्थमिति किंतु निमित्तमतीतस्यानंतरा न भवंति वर्त्तमानाः हेतुमाह सिद्धांती पूर्वपश्चिमताभावात् विपर्ययेता विपर्य
रीमनतलाखिंसूत्रयति अनुपलंभवैधर्म्येण दर्शयति यथानागतवर्त्तमानयोरिति उपसंहरति तस्मादनागत एव समनंतरः पूर्वत्वेन भवति वर्त्तमानस्य नातीतः अतीतस्य ६२
वर्त्तमानः पूर्वत्वेन समनंतरो नाव्यपदेश्याः तस्माद्धर्मेणापि विष्टातीतः इति सिद्धं १०

स्यादेतत् अनुभूयमानानुभूततया उदितातीतौ शक्यावुन्नेतुं अव्यपदेश्यस्तु न दृष्टो अव्यपदेश्यात् तयैव शक्यतोन्नेतुमित्याशयवान् पृच्छति अथाव्यपदेश्याः के के इत्युपसमीक्ष्याम:
अत्रोत्तरमाह सर्वं सर्वात्मकमिति यत्रोक्तमिति तदेवोपपादयति जलभूम्योरिति जलस्य हि रसरूपस्पर्शशब्दवतो भूमेश्च गंधरसरूपस्पर्शशब्दवत्याः पारिणामिकं वनस्पति
फलगुल्मादिषु मूलफलपुष्पसदपत्रवाद्यितरसादिवैश्वरूप्यं दृष्टं सोयमनेवमात्मिकाया भूमेरनादृशस्य वा जलस्य परिणामो भवितुमर्हतीत्युपपादितं हि नासदुत्प
द्यत इति तथा स्थावराणां पारिणामिकं जंगमेषु मनुष्यपशुमृगादिषु रसादिवैचित्र्यं दृष्टं उपभुंजाना हि ते फलादीनि रूपादिभेदसंपदमापादयंतीति एवं जंगमानां पारि
णामिकं स्थावरेषु दृष्टं रुधिरावसेकात्किल दाडिमीफलानि तालफलमात्राणि भवंति उपसंहरति एवं सर्वं भूम्यादि सर्वरसाद्यात्मकं तत्र हेतुमाह जात्यनु
च्छेदेन जलत्वभूमित्वादिजातेः सर्वत्र प्रत्यभिज्ञायमानत्वेनानुच्छेदात् ननु सर्वं चेत्सर्वात्मकं हंत भोः सर्वस्य सर्वदा सर्वत्र सर्वथा सन्निधानात्समानकालं भावानामभिव्यक्तिः प्रस

अथाव्यपदेश्याः के सर्वं सर्वात्मकमिति यत्रोक्तं जलभूम्योः पारिणामिकं रसादिवैश्वरूप्यं स्थावरेषु दृष्टं तथा स्थावराणां जंगमेषु जंगमानां स्थावरेष्वित्येवं जा
त्यनुच्छेदेन सर्वं सर्वात्मकमिति देशकालाकारनिमित्तापबंधान्न खलु समानकालमात्मनामभिव्यक्तिरिति य एतेष्वभिव्यक्तानभिव्यक्तेषु धर्मेष्वनुपाती सा
मान्यविशेषात्मा सोन्वयी धर्मी यस्य तु धर्ममात्रमेवेदं निरन्वयं तस्य भोगाभावः कस्मात् अन्येन विज्ञानेन कृतस्य कर्मणोन्यत् कथं भोक्तृनाधिक्रियेत तत्स्मृत्यभा
वश्च नान्यदृष्टस्य स्मरणमन्यस्यास्तीति वस्तुप्रत्यभिज्ञानाच्च स्थितोन्वयी धर्मी यो धर्मान्यथात्वमभ्युपगतः प्रत्यभिज्ञायते तस्मान्नेदं धर्ममात्रं निरन्वयमिति॥ १४॥

ज्येत न खलु सन्निहितान्यविकलकारणे कार्याणि विलंबमर्हंतीत्यत आह देशकालेति यद्यपि कारणं सर्वं सर्वात्मकं तथापि योयस्य कार्यस्य देशो यथा कुंकुमस्य काश्मीरः तेषां सत्त्वेपि पांचाला
दिषु न समुदाचार इति न कुंकुमस्य पांचालादिष्वभिव्यक्तिः एवं निदाघे न प्रावृषः समुदाचार इति न तदा शालीनां एवं न मृगी मनुष्यं प्रसूते न तस्यां मनुष्याकारः समुदाचार इति एवं नापु
ण्यवान् सुखरूपं भुंक्ते न तस्मिन्पुण्यनिमित्तस्य समुदाचार इति तस्माद्देशकालाकारनिमित्तानामपबंधाद्बंधादपगमान्न समानकालमात्मनां भावानामभिव्यक्तिरिति तदेवं धर्मान्विभ
ज्य तेषु धर्मिणोनुगमं दर्शयति य एतेष्विति सामान्यं धर्मिरूपं विशेषो धर्माः तदात्मोभयात्मक इत्यर्थः तदेवमनुभवसिद्धमनुगतं धर्मिणं दर्शयित्वा तमनिच्छतो वैनाशिकस्य
लक्षणिकां विज्ञानमात्रं चित्तमिच्छतोऽनिष्टप्रसंगमुक्तं स्मारयति यस्य त्विति वस्तुप्रत्यभिज्ञानाच्चेति न हि देवदत्तेन दृष्टं यज्ञदत्तः प्रत्यभिजानाति तस्माद्य एवानुभविता स एव प्रत्य

पा॰टी॰ क्रतुः किमेकस्य धर्मिणः एक एव धर्मलक्षणावस्थालक्षणः परिणामः उतवहवो धर्मलक्षणावस्थालक्षणाः परिणामाः तत्र किं प्राप्तमेकत्वाद्धर्मिण एक एव परिणा-
६३ मः न ह्येकरूपात्कारणात्कार्यभेदो भवितुमर्हतीति तस्याकस्मिकत्वप्रसंगादिति एवं प्राप्ते उच्यते क्रमान्यत्वात्परिणामान्यत्वं एकस्यामपि मृदश्चूर्णपिंडघटकपालकणकारा
परिणतिपरंपरा क्रमवती लौकिकपरीक्षकैरध्यक्षेण समीक्ष्यते अन्यश्चेदं चूर्णपिंडयोरानंतर्यमन्यश्च पिंडघटयोरन्यश्च घटकपालयोरन्यश्च कपालकणयोरिति
त्रपरस्यापरपूर्वत्वात्सोयं क्रमभेदः परिणामभेदे एकस्मिन्ननेकप्रमाणः परिणामभेदमापादयति एकोपि च मृद्धर्मी क्रमोपनिपातितत्सहकारिसमवधानक्रमे

क्रमान्यत्वं परिणामान्यत्वे हेतुः एकस्य धर्मिण एक एव परिणाम इति प्रसक्ते क्रमान्यत्वं परिणामान्यत्वे हेतुर्भवतीति तद्यथा चूर्णमृत्पिंडमृद्घटमृत्कपालमृ-
त्कणमृदिति च क्रमः यो यस्य धर्मस्य समनंतरो धर्मः स तस्य क्रमः पिंडः प्रच्यवते घट उपजायत इति धर्मपरिणामक्रमः लक्षणपरिणामक्रमो घटस्यानागत-
भावाद्वर्तमानभावे क्रमः तथा पिंडस्य वर्तमानभावादतीतभावे क्रमः नातीतस्यास्ति क्रमः कस्मात् पूर्वपरतायां सत्यां समनंतरत्वं सा तु नास्त्यतीतस्य तस्मात् द्वयोरेव
लक्षणयोः क्रमः तथावस्थापरिणामक्रमोपि घटस्याभिनवस्य प्रांते पुराणता दृश्यते सा च क्षणपरंपरानुपातिना क्रमेणाभिव्यज्यमाना परां व्यक्तिमा-
पद्यत इति धर्मलक्षणाभ्यां च विशिष्टोयं तृतीयः परिणाम इति १५

ण क्रमवती परिणामपरंपरा मुद्धहन्नैतामाकस्मिकयतीति भावः धर्मपरिणामान्यत्ववल्लक्षणपरिणामान्यत्वेऽवस्थापरिणामान्यत्वे च समानं क्रमान्यत्वं हेतुरिति तदेतद्भाष्ये ६३
णावद्योत्यते एकस्य धर्मिण इति क्रमक्रमवतोरभेदमाश्रित्य यस्य स तस्य क्रम इत्युक्तं तथावस्थापरिणामक्रम इति तथा हि कीनाशेन कोष्ठागारे प्रयत्नभररक्षितानामपि व्रीह-
यो हायनेन रात्रिबहुभिः परिणामस्य शक्ति विशीर्यमाणावयवसंस्थानाः परमाणुभावमनुभवंतो दृश्यंते न चापमभिनवानामकस्मादेव प्रादुर्भवितुमर्हतीति तस्य तल्लक्षणा
परा क्रमेण सूक्ष्मतरसूक्ष्मतमरसबृहत्तरबृहत्तमादिक्रमेणाभ्येषु विशिष्टोपलभ्यत इति १५

तदिदं क्रमान्यत्वं धर्मधर्मिणोर्भेदमपेक्ष्योक्तं तस्मादाह तत्रेति आविकारेभ्य आविकारेभ्य आव लिंगादापेक्षिको धर्मधर्मिभावो भ्रमादेरपि तन्मात्रापेक्षया धर्मत्वादित्याह धर्मोऽपीति य
दा परमार्थधर्मिणापि निरोभेदोपचारः प्रयोगस्तद्द्वारेण सामानाधिकरण्यद्वारेण धर्म्येव धर्म इत्यायातं तदेकरूप परिणामो धर्मिपरिणाम एवेत्यर्थः धर्मलक्षणावस्थानां धर्मस्वरूपा
भिनिवेशात् तद्भेदेन धर्मिणो दूरोत्सारितं कूटस्थनित्यत्वमित्युक्तं प्राप धर्मपरिणामं प्रतिपादयत्प्रसंगेन चित्तधर्माणां प्रकारभेदमाह चित्तस्येति परिदृष्टाः प्रत्यक्षाः अपरिदृष्टाः
परोक्षाः तत्र प्रत्ययात्मकाः प्रमाणादयो रागादयश्च वस्तुमात्रात्मका ग्राह्यरूपतामाह स्यादेतत् अपरिदृष्टाभ्यंतरत्वे सत्त्वे कथमत्र आह अनुमानेन प्रापितो वस्तुमात्रेण सद्भावो येषां ते

तएते क्रमाः धर्मधर्मिभेदे सति प्रतिलब्धस्वरूपाः धर्मोऽपि धर्मी भवत्यन्यधर्मस्वरूपापेक्षयेति यदा तु परमार्थतो धर्मिण्यभेदोपचारस्तद्द्वारेण स एवाभिधीयते धर्मस्तदायमेक
त्वेनैव क्रमः प्रत्यवभासते चित्तस्य द्वये धर्माः परिदृष्टाश्चापरिदृष्टाश्च तत्र प्रत्ययात्मकाः परिदृष्टाः वस्तुमात्रात्मका अपरिदृष्टास्ते च सप्तैव भवंति अनुमानेन प्रापितवस्तु
मात्रसद्भावाः निरोधधर्मसंस्काराः परिणामोऽथ जीवनं चेष्टा शक्तिश्च चित्तस्य धर्मा दर्शनवर्जिता इति १५ १३

तथोक्तः परमात्मानसाधर्म्यादागमोऽप्यनुमानं समाप्तमादिष्टकारिकया संगृह्णाति निरोध इति निरोधः वृत्तीनामसंप्रज्ञातावस्था चित्तस्यागमतः संस्कारशेषभवोऽनुमान
तः श्च समधिगम्यते धर्मप्रहरणेन पुण्यापुण्यरूपलक्ष्यपतिकृचितकर्मेति पाठस्तत्रापि तज्जनितेन पुण्यापुण्यरूपे एव गृह्येते ते चागमतः सुखदुःखोपभोगदर्शनाद्वानुमानतोऽव
गम्येते संस्कारस्तु स्मरणेनानुमीयते एवं त्रिगुणत्वाच्चित्तस्य चलं च गुणवृत्तमिति प्रतिक्षणं परिणामोऽनुमीयते एवं जीवनं प्राणप्रयत्नभेदोऽसंवेदितः चित्तस्य धर्मः श्वासप्रश्वासा
भ्यामनुमीयते एवं चेतसश्चेष्टा क्रिया यथा यथा नेत्रादींद्रियैः शरीरप्रदेशे वा संयु[illegible]ज्यते सापि तत्संयोगाद्वानुमीयते एवं शक्तिरप्युद्भूतानां सूक्ष्मावस्था चेतसो धर्मः स्थूल
यामीनुभवाद्वानुमीयत इति १३॥

पा॰टी॰
६४

अमतः परमापदपरिसमाप्तेः संयमविषयस्तद्वशीकारस्तत्र नीविभूतिश्च वक्तव्यतेत्यतो क्रमकारपरिणामत्रयमेव तावत्प्रथममनुपात्तसकलयोगांगस्य योगिनः संयमविषयक्षिपतिपन्नं ननु यत्र
संयमस्तत्रैव साक्षात्कारस्तत्कथं परिणामत्रयसंयमोऽतीतानागते साक्षात्कारयेदित्यत आह तेन परिणामत्रयं साक्षात्क्रियमाणं तेषु परिणामेष्वनुगतेऽप्यतीतानागते तद्विषयं ज्ञा
नं संपादयति। परिणामत्रयसाक्षात्करणमेव तदन्तर्भूतातीतानागतसाक्षात्करणात्मकमिति न विषयभेदः संयमसाक्षात्कारयोरित्यर्थः। अयमपरः संयमस्य विषय उपक्षिप्यते
शब्द अत्र वाचकं शब्दमाख्यिमुः तथ मे तावद्वाग्व्यापारविषयमाह तत्र वागवागिन्द्रियं वर्णांश्च जनकमष्टस्थानेषु यथाहुः अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा जिह्वाजिह्वामूलं
च दन्ताश्च नासिकौष्ठौ च ताल्विति सा वाग्वर्णेष्वेव यथा लोकप्रतीतिसिद्धेऽर्थवती न वाचकरूपेत्यर्थः श्रोत्रव्यापारविषयं निरूपयति श्रोत्रं पुनर्वाचकपुध्वितेरुदाजस्य वागिन्द्रियाभि
घातितो यः परिणामविशेषो वर्णात्मा तेनाकारेण परिणतं तन्मात्रविषयं न तु वाचकविषयमित्यर्थः। यथा लोकप्रतीतिसिद्धे ध्वनिवर्णौ न वाचकमिति। पदं पुनर्वाचकं पुनर्नादानुसं

अतो योगिन उपात्तसर्वसाधनस्य बुभुत्सितार्थप्रतिपत्तये संयमस्य विषय उपक्षिप्यते परिणामत्रयसंयमादतीतानागतज्ञानं धर्मलक्षणावस्थापरिणामेषु संयमाद्यो
गिनोऽतीतानागतज्ञानं धारणाध्यानसमाधित्रयमेकत्र संयम उक्तः तेन परिणामत्रयं साक्षात्क्रियमाणमतीतानागतज्ञानं तेषु संपादयति १६ शब्दार्थप्रत्यया
नामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानं तत्र वागवर्णेष्वेवार्थवती श्रोत्रं च ध्वनिपरिणाममात्रविषयं पदं पुनर्नादानुसंहारबुद्धिनिर्ग्राह्यमि
ति वर्णा एकसमयासंभावित्वात्परस्परनिरनुग्रहात्मानस्ते पदमसंस्पृश्यानुपस्थाप्याविर्भूतास्तिरोभूताश्चेति प्रत्येकमपदस्वरूपा उच्यते १७

हारबुद्धिनिर्ग्राह्यं यथाप्रतीतिसिद्धान्नादाद्वर्णाननेकं गृहीत्वानुपश्चादध्यासं हरत्येकत्वमापादयति गौरित्येतदेकं पदमिति तथा पदं गृहीतेऽपि घनिमान्यो पिवृद्धयो वर्णाकारं पद
मेव प्रत्येकं गोचरयति तथापि न विशदं प्रथते वर्णेनैतद्विज्ञानेनेदमिति विशदमिति नादानुसंहारबुद्धिनिर्ग्राह्यमुक्तं पदस्तु वैजात्यादेकपद्यानुभवमविज्ञायवर्णनैव वाचकानानुष्ठ
तेतिप्रत्याहरत्यौरितिसर्वत्र चरमो वर्णः प्रत्येकं वाच्यविषयो विषयमात् ध्वनिरत्वागतं तको इव शिक्यावलंबनं। महंताचाग्नादाराणां विषिठरधारणीननतावत्प्रथमः कल्पः एकस्मादर्थप्र
तीतेरनुपपत्तेः उमनीवाद्वितीयादीनामनुद्धारणप्रसंगो निष्पादितक्रियेकर्म्मणि विशेषाधानाधायिनः साधनस्य साधनन्यायापातिपातात् तस्मात् द्वितीयः परिशिष्यते संभवति ग्ना
वग्णसंहतानामपि हरधारणाः एकसमयभावित्वात्वर्णानां तु वैगपद्यासंभवात् परस्परमनुग्राह्यानुग्राहकत्वायोगात्संभूयापि नार्थधियमादधते रूपमेकमसंस्पृशन्तस्तादात्म्येनात
वानुपस्थापयन्तः आविर्भूतास्तिरोभूताश्च शलाकाकल्पाः प्रत्येकमपदस्वरूपा उच्यते १७